No. ४२४१

Title शास्त्रदीपिका नवमाध्याय:

Author पार्थसारथि मिश्र:

Extent ४१ पत्र Age सं. १८६४

Subject मीमांसा

श्यामन्त्रदीपिकानवमाध्यायः

४२४१

शास्त्रदीपिकानां नवमोध्यायः पत्रे ४१

श्रा·
॥श्रीगणेशाय नमः॥ यत्नकर्मप्रधानं नन्दिचोरनाभृतं नस्यद्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात्॥ सिद्धे तिदेशे धुना
१ तिदिष्टानां पदार्थानां मंत्रसामसंस्काराणां द्वारां नरसंबंधनिमित्तान्यथाभावात्मकऊहश्चिंत्यते नस्य चातिदिष्टविषयत्वा
दतिदेशानन्तरकालत्वमारंभः॥ अतिदेशाधीनत्वमेवदर्शयितुं समस्तमाधसिद्धमपूर्वप्रयुक्तत्वं धर्माणामनेन सूत्रेण स्मारयति॰
यजिप्रयुक्तत्वे हि पारिप्लवाधर्माः सर्वत्रोपदिष्टानान्यथाकर्तुं शक्यं ते॰ अपूर्वप्रयुक्तत्वे तु प्रतिमकरणंव्यवस्थिता धर्मा दृश्य
माघन्यायेन कार्यमुखेनातिदिष्टायुक्तं यद्धूहं भजंते नस्मादूह विवक्षयाऽपूर्वप्रयुक्तिः॥ स्मारिनानन्दीयो पूर्वोत्तरपक्षो नत्रैव
प्रदर्शिनाविति नेह प्रदर्श्यते। तथान्यदिह चिंत्यते। किमवघातमंत्रादयो विवक्षितव्रीहिस्वरूपादिद्वारा अपूर्वस्यैवोपकुर्वंति उता
विवक्षितनत्स्वरूपाः॥ साधनविशेषमात्रद्वारा इति॥ स्वरूपविवक्षायां हि तदभावान्नीवारादिषूहो नस्यात्॥ अविवक्षितत्वे तु नी
वारादावपि साधनविशेषसद्भावात्सिध्यत्यूहः॥ व्रनतु साधनस्यापि द्वारशेषेणमासिकस्य द्वारत्वादिक्तौ चदभावान्कथमूह राम·
॥ यस्यापूर्व— स्यावघातोंगतहीयं साधनंद्वारमितिचेत्। न। नयासत्या ज्योषधसात्राप्यानां धर्मसंकरः स्यान्नयाणामपि नदी १

यसाधनत्वान् अथ प्रात्यादिद्वारेणेदेनसाधनत्वेनेदाघवस्यानन्तो विक्रनो— न द्वाराभावादवघातादेरप्रवृत्तिः॥ उच्य
ते॥ अवहनेरपूर्वं कुर्यादिति शास्त्रार्थः साधनप्रयुक्तिपक्षे न तद्वत् कुर्यादिस्मन्निर्देशे अवहननैः कुर्यादिसर्थो भवतीति तस्मा
त्सिध्यति विक्रनावघातः। तेन यस्मापूर्वस्यावघातेनांगमिसादिकुशकाशावलंबनमनर्थकं। यदपि परं धर्मसाकुर्यायस्या
दिसास्त्रांनावन्॥ एवं प्रोक्षिताभ्यां उलूखलमुशलाभ्यामिसत्रागम्मसुवः सुवरगन्मेसत्रावहंतिस्वरूपं स्वर्गरूपं च सं
स्कारमंत्रयोरपूर्वार्थयोर्द्वारमुनापूर्वसंबंधिविशेषस्तितुल्यो विचारः। न च ब्रीह्यादीनां श्रुतानामविवक्षाकारणाभ्यां वा तत्
द्वारेणैवापूर्वार्थत्वं। साधनरूपस्यावर्जनीयत्वादस्मथावघातादेरानर्थक्यमानन्मात्रमेवविवक्षितमितिसिद्धांतः। नदेन
दिहसंक्षिप्तमुपरितनेस्मिन्नधिकरणे प्रपंचयिष्यते॥ सेयं द्विनीपवर्णकस्येकाव्याख्यातयान्यानि॥ सप्तमाघे हि
यज्यर्थत्वेपि धर्माणामपूर्वविशेषनिमित्तमात्रेणाव्यवस्थासिद्धेर्नैकांतेनापूर्वार्थत्वं मुसादनीयमिहत्वपूर्वार्थत्वमंत
रेणैवासिद्धेरपूर्वार्थत्वंप्रतिपाद्यते। यत्तिस्वरूपार्थत्वे हि तु त्समायत्वादवघातादीनां ब्रीह्यादिस्वरूपार्थत्वंस्यात्तदभावा

भ्रा॰ वनीवारादाव् होतस्यादिति। तस्यैवापरा व्याख्या। सप्तमाद्येसा धारणेनापूर्वार्थत्वमिह त्वाराद्उपकारकाणां अपूर्वार्थत्वं प्रकरणा
२ त्स्यात्॥ सन्निपातिनां तु श्रुत्यादिसंयुक्तव्रीह्याद्यर्थत्वावगमात् तदप्रयुक्तत्वमिसाशंक्य तेषामपि व्रीह्यादिस्वरूपपर्यवसायि
नामानर्थक्यात् द्वारेणापूर्वार्थत्वं प्रतिपाद्यते। तदेतेनु त्रिष्वपि पक्षेषु अथवेत्यादि भाष्यं अस्माभिस्तु तरत्वेनैव व्याख्यातं।
अथवा न्यामित्यादिना भाष्येण पुनर्वर्णिकांतरमारब्धं॥ तदुच्यते। सप्तमाद्येपूर्वार्थत्वं सिद्धमिह तु किमपूर्वार्थानां ध
र्माणां यजिर्निमित्तं उत निमित्तमपि अपूर्वमेवेति चिंत्यते। तत्रानिमित्ता प्रवृत्तिः। कादाचित्कत्वात्॥ येन विचारेण तस्मात्॥
तत्रापूर्वस्य साध्यत्वान्निमित्तता नयुक्ता॥ तस्माद्यजिरेव निमित्तं तत्तुल्यन्यायत्वाच्चावघातादीनामपि व्रीह्यादिस्वरूपं निमि
त्तमितितद्भावान्निवारादिषु तस्यादिति प्राप्ते ब्रूमः ४। यजेस्तावन्निमित्तत्वं न केनचिदिहोच्यते॥ अपूर्वस्यापि तेनोक्रम
र्थोतस्य निमित्तता। साध्यं हि साधनानुष्ठाने निष्पन्नेपि तिन मनिष्पन्नमपि मनसि साध्यतया विपरिवर्तमानं। तस्मा राम
दपूर्वार्थाधर्मास्तं निमित्ताः च विकृत्यपूर्वमपि तेषां धर्माणाम निर्देशेन साध्यमवगतं तत्साधनभूतनीवाराद्यंगत्वेना २

वघातादीननुष्ठापयतीतिसिध्यत्सूत्रः॥संस्कारेयुज्यमानानांतादर्थ्यात्तत्प्रयुक्तंस्यात्॥पूर्वाधिकरणेधर्माणामपूर्वार्थत्वं
सत्तमाधसिद्धंस्मारितंततएवद्रव्यसंस्कारोपितत्प्रयुक्तइतिसंक्षेपतःप्रतिज्ञामात्रेणोक्तं॥इदानींतुतदेवश्रुत्यादिवि
रोधात्संभवतीत्याशंक्योपपाद्यते।तत्रेहवाक्यसंयुक्तानांफलदेवतयोःशेषत्वंलिंगसंयुक्तानांद्रव्यसंख्यादीनांतुसमुदाय
मिसत्रश्रुतिसंयुक्तानामपूर्वार्थत्वंप्रतिपाद्यते॥दर्शपूर्णमासयोः श्रूयतेप्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहंति।प्रो
क्षिताभ्यांदृषदुपलाभ्यांपिनष्टीति।तत्रप्रोक्षितशब्देनविशेषणप्राधानेनतृतीयांतेनान्यसाधनभूतयोरुलूखललयोर्दृ
षदुपलयोश्चसंस्कारकंगम्यमानंप्रोक्षणंयत्तयोःसाध्यंतदर्थमितिसविवादं॥इदंतुविंत्यते॥यत्तयोर्हंतिपिषिसाधन
त्वंतदर्थंसत्प्रोक्षणंहंतिपिष्यर्थमुतपदपूर्वंसाधनत्वंतदर्थत्वात्पूर्वार्थमिति।तत्र।अवहंतिश्रुतेस्तावदवघातःप्रतीय
ते॥तत्साधनत्वमेवातस्तृतीयातोवगम्यते।सामानाधिकरण्याच्चप्रोक्षणंतद्विशेषणं।एवंहंसमर्थतापूर्वशेषत्वंप्रक्रिया
वशात्॥तत्रवाक्यसंयुक्तस्यप्रकरणमीष्टे।हंतिपिषिद्वारेणापूर्वार्थत्वादुभयमविरुद्धमितिचेत्॥नउभयार्थतासंभ

श्रा॰ वात्। न हि प्रकरणाधीनत्वमात्रेण प्रकृतार्थता संभवति। किं तर्हि प्रकृतेनैकवाक्यतां कल्पयित्वा। न चौहं तिपदेन प्र
१ धानवाक्येन च युगपदेकवाक्यता संभवति न चान्यतरस्मिन्नवहानव्ये प्रकरणं बाधित्वा हंतिनैवान्वयमध्यवस्यामः। नव
प्रोक्षणं तस्यानर्थक्यं। हंतेरपूर्वार्थत्वात्तदर्थमपि प्रोक्षणमपूर्वस्योपकरोत्येव। यथाधानमग्निद्वारेण क्रतूनामुपकारकम
पि क्रतुविधिभिर्न गृह्यते तथा प्रोक्षणमपूर्वार्थस्य हंतेरंगमपि न तत्स्वरूपपर्यवसायित्वेन विधीयमानं न क्रतुविध्ये
कवाक्यतां गच्छति। यच्च प्रधानवाक्यशेषभूतं न दृष्टविकृतिष्वतिदिश्यते। न तत्रावधानं क्रत्वंगत्वादतिदिश्यते। न प्रोक्ष
णमनतिदेष्टत्वात्। अवधानं च स्वरूपगत्येतत्स्वांगभूतं प्रोक्षणमाकर्षतीति कृत्वा विकृतिषु प्रोक्षणमनुष्ठीयते न खनिर्भिन्नेतु
तरावर्तवधानस्याभावान्न प्रोक्षणस्याकर्षकमस्तीति न नखेषु प्रोक्षणमुहितम्। अथाप्यवधानद्वारेण क्रत्वंगं प्रोक्षणं
तथापि नत्स्वारूपमेवद्वारमिति नदभावान्नखेषु नास्ति प्रोक्षणमिति प्राप्तेभिधीयते॥ अवधानावसायं सन्प्रोक्षणस्या राम॰
दनर्थकं। विनापि प्रोक्षणं हंतिरूपनिष्पत्तिदर्शनात्॥ न द्वारेण तत्पूर्वार्थे भवन्नानर्थकं भवेत्॥ न हि तेन विना तस्य निष्प ३

त्तिरवगम्यते।तेनावघातमात्रेणप्रयोजनानवाप्तेः वाक्यमुक्तमवघातमतिक्रम्यापूर्वार्थतांप्रकरणादर्थ्यते
।नचतदेकवाक्यतामन्तरेणानार्थ्यंसंभवति॥नचहन्तिनापूर्वेणचपपकृपृथगेकवाक्यतासंभवतिप्रोक्षिताभ्यांहं
तिःप्रोक्षिताभ्यामपूर्वंभावयेदिति।वाक्यंहितयाभिधत्ते।तस्मादेवंद्रष्टव्यं।हन्तेर्ईरूपेहन्तिरूपंतण्डुलनिर्वृत्तिप्रनाड्यापू
र्वजननव्यापारविशेषणा।तत्रवाक्यात्प्रोक्षणंप्रतिप्राधान्यमापद्यमानोवघातः श्रौतस्यस्वरूपस्यान्यथापिसंभवात्
तेनात्मनाप्राधान्यासंभवात्स्वापूर्वजनन।व्यापारात्मनाप्राधान्यंप्रतिपद्यते।तद्रूपस्यविनाप्रोक्षणेननिष्पत्त्यनवगमात्त
त्स्वरूपप्रतिपत्तिपरश्चहन्तिशब्दः। एवमुलूखलमुसलयोरपिद्रष्टव्यं।स्वरूपंहन्तिसाधनरूपंचविनाप्रोक्षणंतासंभव
तीतियत्तयोर्हन्तिशब्दावगतापूर्वव्यापारविशेषंप्रतिसाधनत्वंतेनात्मनात्मनाप्रोक्षणसंस्कार्यत्वंगम्यते।तदेषवा
क्यार्थः।येनव्यापारेणतण्डुलनिर्वृत्तिप्रनाड्यापूर्वंक्रियते तंव्यापारंप्रोक्षितेनसाधनेनकुर्यादिति।तत्रनखनिर्भिन्ने
वैरोहलतस्यावघातंतण्डुलनिष्पत्तिप्रनाड्याऽपूर्वजननव्यापारत्वान्नखानांचतत्साधनत्वात्प्रोक्षणंसिध्यति।नन्वे

शा. वमवमव हंतिशब्दउलूखलमुसलशब्दो चलक्षणावृत्तास्तुः समसमानर्थक्याद्दूरलक्षणा॥ तस्मादपूर्वप्रयुक्तं प्रो
४ क्षणं॥ पूर्वपक्ष॥ यावसावाचाकामयीतनावसातीरीक्षणी याम नु ब्रूयादितिश्रुतः ४ स्वरविशेषः ४ किं ज्योतिष्टोमापूर्व
प्रयुक्तः उत दीक्षणीयाप्रयुक्त इति विचार ४। तत्र। फलवत्स्वरमापूर्वं तच्छेषत्वं ततो भवेत्॥ स्वापूर्वं क्रतुशेषत्वान्तस्व
यं फलवपतः। फलवच्छेषता युक्ता न तु नि ४ फलशेषता॥ तस्मात्तत्साधने रूपे स्वरभेदे विधीयते। उच्यते॥ एवमाश्री
यमाणे हि भवेत्तल्लक्षितलक्षणा। स्वापूर्वलक्षणामात्रं तस्मात्तच्छेषतावरं। तच्छेषत्वेपि धर्मस्य नानर्थक्यं प्रसज्यते। तस्याप्य
दृष्टरूपत्वात्फलापूर्वोपयोगतः। फलवत्स्वरमापूर्वोपयोगित्वाद्यजमानसंस्काररूपं दीक्षणीयापूर्वं फलवदेव। न ना
दर्थ्यस्यानर्थक्यं प्रसज्यते॥ अदृष्टत्वाच्च तद्रूपस्य विना धर्मैरवघातादिवत्सिध्यनवगमात्संभवति प्रयोजकत्वमि
ति तादर्थ्यमेव युक्तं। दीक्षणीयाहि केनाप्यनाधर्मेण हन्तातीक्षपेक्षायां स्वापूर्वसाधनत्वं शीघ्रं गम्यते। तद्द्वारं तु पर
मापूर्वसाधनत्वं विलंबितं॥ तस्मात्स्वरा अंतरापूर्वप्रयुक्ता एवं जानीपकाः ४ एतेन प्रोक्षणपंगानामुसवनादीनां राम. ४

तज्जन्यअग्नीषोमादिसमवेतापूर्वप्रयुक्तत्वंव्याख्यातं। आरादुपकारकप्रयाजाद्यंगानांतरपूर्वप्रयुक्तत्वं। संस्कारो
पित्वदृष्टार्थत्वादपूर्वमितिगीयते। प्रयाजापूर्ववन्नस्माउभयंस्मात्प्रयोजकं॥ फलदेवतयोश्च। आग्नेयसुवः सुवरगन्म
अग्नेरहमुज्जितिमनूज्जेषमितिदर्शपूर्णमासप्रकरणपठितौमन्त्रौ किंस्वर्गस्वरूपाग्निरूपप्रयुक्तावुतपरदर्शपू
र्णमासापूर्वसाध्यस्वरूपंफलस्याग्नेश्चतदीयदेवतास्वरूपंतच्छेषौसंतौमंत्रावपूर्वप्रयुक्ताविति। तत्रस्वर्गादिशेष
त्वंभवेल्लिंगेनमंत्रयोः। फलस्यादृष्टरूपत्वात्प्रधानत्वाच्चसर्वतः। अग्न्यादेर्यीयमानस्यफलदायित्वसंभवात्॥ ताद
र्थ्यमेवमंत्रस्ययुक्तंनापूर्वशेषता॥ सत्त्वंफलस्यसर्वस्मात्प्राधान्यंनतुतावता। मंत्रस्तुऽदृष्टशेषस्यादानर्थक्यप्रसं
गतः। नहिमंत्रेणप्रकाशितमात्रंफलंसिध्यतीतिप्रमाणमस्ति। तेनक्रतुमतिलंघ्यस्वर्गार्थत्वंतावन्मंत्रस्यानाशं
क्यं। प्रकरणाम्नानात्तुक्रतुशेषत्वंसन्नतद्वारेणफलार्थस्य। ततश्चक्रत्वपूर्वप्रयुक्ततामेवापद्यते। नहिक्रत्वंगंतदपूर्वा
तिलंघनेनफलंयावन्नेतुंयुक्तं। एवमग्न्यादेरपिफलदायिफलदापिदेवतस्यपिमंत्रेणप्रकाशिनमात्रस्यफललाभोनि।

रा· ष्प्रमाणएवेनिरूक्तत्वन्त्वयित्वेनैव प्रकाश्यत्वमंगीकर्तव्यं।तस्माद्दृष्टव्यंमंत्रप्रकाशितफलदेवतः क्रतुः स्वापूर्वेसा
५ धयतीति।ननश्चविहितोफलंनदेवतां।नरवसामगन्मब्रह्मवर्चसंसूर्यस्याहमुज्जितिमन्त्रेषुमिस्पृहणीयं।तथा
हिमन्त्रनिवर्त्त्यत्वंभवति॥देवतावाप्रयोजयोजयेदतिथिवद्भोजनस्यनदर्थत्वात्॥एवंफलदायित्वेपिनदेवताया
ःप्रयोजकत्वंस्वरूपेणोक्तं।इदानींतुनास्याःफलदायित्वंनापिप्राधान्यमितिप्रतिपाद्यते।सर्वपूर्वोक्ताक्षेपेणेदम
धिकरणमारभ्यते।अपूर्वोपपद्यत्वान्तरितेहिनहिचार्यते।किंयागोदेवताराधनार्थःअस्याश्चाराधितायाःफलमुतापूर्व
द्वारेणयागस्यसाधनत्वमिति।तत्रदूरादेःसंप्रदानत्वात्कर्मणोपिप्रधानता।यागःपूजातदंगंस्यादतिथेर्भोजनंयथा
कर्मकारकंहिक्रियायेप्सिततमंप्रधानं।तेनाप्याप्यमानंसंप्रदानंततोपिप्रधानं।संप्रदानंचदेवतातस्मात्प्रधा
नं।यागश्चदेवतापूजासाचलोकेपूज्यमानीयर्था।अतिथिभोजनादिवा।ततोदेवताराधनार्थोयागः।साचाराधिताफ राम·
लमाराधयित्रेददातीतियुक्तं।एवंचलोकप्रसिद्धंपदार्थस्वभावोनातिक्रांतोभवति।अवश्यंचयागस्यापिफलसाध ५

नत्वं केन चिद्द्वारेणाश्रयितव्यं। स्वरूपस्य भंगुरत्वात्। तत्र रात्रिसत्रन्यायेन वाशेषमंत्रवर्णोपगतदेवतानन्दि
देवद्वारमिति कल्पयितुं युक्तं। न त्वसंनिधापितापूर्वकल्पनं। अर्थने हि न तत एव नेमि इः प्रजया पशुभिस्तर्पयन्ति द्रधसो
यंरपिंमयीति। शब्दैकगम्यत्वाच्च देवताप्रसादस्य स एवापूर्ववद्धर्माणां प्रयोजकः फलसाधनं चेत्सेवं प्राप्ते ब्रूमः। याग
स्यैव परमस्य फलसाधनतोच्यते। देवतायाश्च तायाश्चनार्थ्यं तन्निर्देशुपयोगतः। यागश्च साध्यरूपत्वात्साधनत्वेन
देवतां। गृह्णाति सिद्धरूपा च देवता न तस्य साधनं। प्रत्ययाभिहिता हि भावना पुरुषार्थं भाव्यमपेक्षमाणा परप्रहग
नमपि यागमयोग्यत्वादुपेक्ष्य काम्यमानतदुपनीतं स्वर्गादि गृह्णीत्वा तस्य साधनमाकांक्षन्ती समानपरसुपनीतं या
गमविरोधानुकरणं गृह्णीते। तस्य भावनापेक्षायां द्रव्यदेवतं भूतं भव्ययागनिर्वर्तनसमर्थं तादर्थ्येन गृह्णाति देवतां यागा
र्थां करोति। न च प्रागवगतं देवताया फलार्थत्वं येन तदाराधनाय यागविधिः स्यात्। देवशब्देन ताव यागात्फलं
गम्यते। यच्चातिथिवदिति युक्तं तन्न प्रमाणं न राज्ञो जनस्य तादर्थ्यावगमात्। अपि च तत्रापि नातिथिर्भोजयितु

श्रा. ६ फलं ददाति। प्रीयमाणोऽपि न त्वसौ स्वर्गादिप्रदानायेष्टे॥ तस्माद्देवाराधनादेव फलं। एवं विशिष्टसंप्रदानकत्वेऽपि। तथा
यागेऽपि। यद्यपि देवता विग्रहवती प्रतिगृह्य भुक्त्वा तृप्यति प्रसीदति च तथापि यागादेव फलं। विग्रहवती चानित्या
स्यात्॥ ततश्च नित्यवेदैर्विषयत्वं न स्यात्॥ सत्यपि विग्रहे प्रत्यक्षहविषो देवताया भोगः प्रसक्तविरुद्धोऽशक्यो
ऽनुपगमः॥ न चाभुञ्जाना प्रसीदतीति युक्तं। अत एवाप्रतिपत्त्या पूर्वस्यागेन देवताप्रसादादेव फलमित्येतदपि नि
रस्तं। न हि तस्याः प्रसादः संभवतीत्युक्तं। यत्तु तस्याः यागसाधनद्वारं फलनिर्वृत्त्युपयोगित्वं तदभिप्रायाः देवतायाः फल
दायित्ववादाः। सेनापतिनाग्न्यामोदन्त इत्यादिवत्॥ तत्र मंत्रार्थवादेतिहासपुराणेष्वपि देवतानामपि तथ्यस्मरण
कत्वनुष्ठानब्रह्मास्त्रादिमंत्रतश्च समीहितसिध्यनुकीर्तनात्कर्मण एव फलं गम्यते॥ मंदधियस्तु श्रद्धालवस्तात्प
र्यमजानाना नाम्नामप्यनुनाम। किंच स्तोकमंजुकारिणीनां तिरश्चामचेतनानां चौषधिवनस्पतीनां अश्मांगानां च हनु
दंनारीनामश्वरूपाणां चकृत्स्नेश्वनारीनामश्वचरितानाञ्च हिंकारशल्कनकरणादीनां देवतात्वेन होमेषु श्रूयमा राम. ६

णानां कोनाम फलदायित्वं श्रद्दधीत॥ किंचास्मैवाग्निहोत्रदेवताद आपूज्यमानेंद्रियं दृश्यानि पयसा पशुमिति कोहे
तुरन्यदतो वस्तुस्वभावा। यागजपभोजनाऽनशनादि। भिक्षव किमिति देवतास्तर्पयंति किमिति वासुरापानादिभिः कु
र्वंतियेनासुरयं प्रसवायं वकुर्वंति कर्तुः अथ वैवमादिषु कर्मण एवापूर्वद्वारं फलं तथा सर्वत्रास्तु। तस्मादपूर्व
प्रयुक्ता धर्माः॥ द्रव्यसंख्याहेतुसमुदायं वा श्रुतिसंयोगात्॥ वाक्यसंयुक्तानां लिंगसंयुक्तानां चापूर्वप्रयुक्तिर्याख्या
ताायत्वसंनवलीयस्त्वा श्रुत्या संयुक्तं तस्य प्रकरणादपूर्वार्थत्वं मसंनान्याय्यमिति मन्यमानान् प्रति संयुक्तानाम
प्यपूर्वार्थतां प्रतिपाद्यते॥ अथवा स्वरूपातिक्रमेण साधन संबंधे स्कवादिषु अतिप्रसंगमाशंक्य निराक्रियते।
दर्शपूर्णमासयोः श्रूयते व्रीहीन्प्रोक्षति निति तत्र संशयः॥ किं व्रीहिद्रव्यप्रयुक्तं प्रोक्षणं उतापूर्वप्रयुक्तमिति। य
द्व्रीहिपदाभिधेयं स्वरूपं तन्मात्रपर्यवसितं प्रोक्षणं विधीयते तन्मात्रं च तत्त्वं गां। उत्पत्तेषा साधनरूपं व्रीहि
भिर्यजेतेत्यनेनावगतं तेन प्रोक्षणं संबध्यते क्रत्वर्थता होमस्याशंक्य न व्याउच्यते। तेनत्पन्नं क्रियते इति हेतु

शा.

८

प्रोक्षितैर्यजेतेति। स्वरूपपरत्वे प्रधानविधिविशेषणत्वाभावात् तद्विशेषणस्य तद्विकारेष्वतिदेशाभावात्तत्प्रोक्षणस्य
विकृतिष्वतिदेशः॥ व्रीहिमात्रं त्वतिदिश्यते। तदतिदिष्टं स्वाङ्गभूतं प्रोक्षणमनुष्ठापयतीति विकृतिष्वपि सत्सु व्रीहि
षु प्रोक्षणं स्यादेव। नीवारादिभिस्तु निवर्तितेषु व्रीहिषु प्रोक्षणमुपदेशातिदेशयोरभावान्नीवारादिषु नानुष्ठेयं भव
तीत्यपरानुसाधनविशेषद्वारेण प्रधानविधेरेव विशेषणं प्रोक्षणं तदा अयमर्थः॥ प्रोक्षितैर्व्रीहिभिः साध्यमानेन यागेना
पूर्वं कुर्यादिति। तत्र नैवारहविष्कायां भावनायां तदृष्टत्वेन प्राकृतभावनेऽसंभावे सकलेतिदिश्यमाने नीवारैर्व्री
हिमात्रे निवर्तिते तत्स्यस्य तद्रूपस्यैवावस्थानात् नीवाराणां च व्रीहिस्थाने निवेशाद्देवार्थो भवति प्रोक्षितैर्नीवारैर्य
जेतेति। अतश्च नीवारेषु प्रोक्षणं सिद्धं भवति॥ तथा त्रीन् परिधीनिति मंत्रः त्रित्वसंख्याप्रयुक्तः उतापूर्वार्थपरि
धीयतां प्रकाशनार्थः॥ सत्त्व पूर्वं प्रयुक्त इति॥ इदं तु लिंगविनियोगत्वादिहानुहरणं। अतिप्रसंगनिराकरणपक्षे राम
तु भवत्येवोदाहरणं॥ तथा चतुर्होत्रा पौर्णमासीमभिमृशेत् पंचहोत्रामावास्यामित्यभिमर्शनं किं पौर्णमास्यमावास्या ८

समुदायप्रयुक्तमुक्तं पूर्वं प्रयुक्तमिति । चातुर्मास्येषु श्रूयते शूर्पेण जुहोति तेन ह्यन्नं क्रियत इति । हेतुनिर्देशः किं
मन्नकरणप्रयुक्तो होमोऽन्नकरणानां शूर्पदर्वीपिठरादीनामंगं उताराद् उपकारकोऽपूर्वार्थ इति विचारः ४ ननु तृतीयानि
र्देशादिह ह्यस्य नन्नसंस्कारार्थता होमस्याशंक्य निराक्रियते । तेन ह्यन्नं क्रियत इति हेतुनिर्देशोऽयं हि शब्दश्रुतसामर्थ्या
म्यनेयाप्यस्य हेतुर्भवति । प्रधानं चांगेन व्याप्यते नांगं प्रधानेन । यत्र प्रधानं तत्रांगं । न यत्रांगं तत्र प्रधानं । तस्माद्धेतुश्रुतिसा
माप्यत्वेन धूमवदवगम्यमानं अन्नकरणं प्राधान्येनावसीयत इति होमस्तदर्थ इत्याशंका । तत्र श्रुतिबलीयस्त्वाद्व्रीह्या
दिद्रव्यशेषता प्रक्रियावगतापूर्वशेषत्वस्यावबाधनी व्रीह्यादिषु शेषत्वे सत्यानर्थक्यमापतेत् ॥ प्रोक्षणस्य विनाप्यस्मा
त्संस्कारसिद्धिः ४ । तस्मात्साधनरूपं यद्व्रीहीणां शास्त्रचोदितं । तेन रूपेण संबंधः प्रोक्षणादेर्विधीयते । एतत्तु वंति हि
व्रीहयः ४ शास्त्रान्तरावगतमात्मीयमपूर्वसाधनत्वं हविरूपत्वं लक्षणयावगमयितुं तेनात्मना प्रोक्षिणं गृह्णं गृह्णंति ह
वीरूपस्य च विवक्षितत्वान्न तानि प्रसंगं गं ४ । यदि पुनरेकेन वाक्येन संस्कारो द्रव्यं च विधीयते प्रोक्षिते व्रीहिभिर्यजेतेति तदा

ग्रा· पि किं सिध्यति साधनरूपान्वयः प्रोक्षणस्याम् पुनरां सिध्यतीति ब्रूमः नहि नत्र व्रीहिसंबंधः प्रोक्षणस्य साधनत्वे
८ नैवोपदिश्यमानं द्रव्यं संस्कारेण व्रीहित्वेन च विशेष्यमन्यत्र निष्कः साधनसंसंबंधः। अयं हि नत्रार्थः व्रीहिजाती
यं प्रोक्षणसंस्कृतं च यत्तेन यजेतेति न तन्नश्यव नीवारादिषु विरोधाद्व्रीहिसाधनत्वे निवर्तितेऽपि प्रोक्षितसाधनतान
निवर्तिते नेति सिद्धं न त्रापि प्रोक्षणं। यत्र न हि संस्कारवाक्ये द्रव्यं निर्दिश्य सर्वनाम्ना च द्रव्यं परामृश्य यागे विनियुज्य
नेनुप्तेपयसि दध्यानयतीति सा वैश्वदेव्यामिक्षेति। नत्र कथं न त्राविपर्ययपि नप्राकूप्यमः साधनत्वं विदितेनापि संस्कार
वेलायां गम्यते नथापि भावि विनियोगाव गम्यसाधनत्वापेक्षा एवायं संस्कारविधिः अन्यथाऽनर्थक्यात्। ननु साधनत्वं
पूर्वानवगतं कथं पयसा लक्षयितुं शक्यं। न पदप्रवृत्तिवेलायामेव स्वार्थं हित्वा साधनविशेषं लक्षयित्वा संस्कारान्वयं
प्रतिपादयतीति ब्रूमः किं नर्हि प्रथमं पयः शब्दः स्वार्थस्य संस्कारान्वयिना रूपं वाक्यार्थं प्रतिपादयति। नरूप राम·
स्य च कार्योन्नरो पयिकनामंत्तरेणानुपपत्तेस्तदाकांक्षायामुपरितनेन वाक्येन संस्कारविशिष्टस्यैकस्य तस्तछव्दयेण ८

मष्टस्य कार्यविनियोगः क्रियते। न दृष्टं च पूर्वं विहितः संस्कार इति पश्चादवगम्यते॥ तदयमर्थः। दृष्टानयनसंस्क
नं पयो वैस्वदेवमिति॥ नन्ववश्यं पूर्वं लक्षितेनैव साधनरूपे संस्काराविधानस्याः। साधनरूपार्थाः संस्कारा इत्येना
वन्नः प्रतिपाद्यं। नच्चैवंविधे विषये नैव सिद्ध्यति। अस्यैव संस्कारस्य साधनरूपानपाये व्रीह्यादिषु तुल्यलक्षणिकं रूपं।
नन्वेवं श्रुतसमर्थस्यैव पयसः संस्कारात्कथं लक्षणावाचो युक्तिः। सत्यं व्रीहिपयः प्रभृतीनां द्रव्याणामेव संस्कारः सन्तु सा
धनरूपसिद्ध्यर्थो न स्वरूपसिद्ध्यर्थः। ननु रूपमशाब्दमित्येनावनालक्षणावाचो युक्तिः। भावत्वस्वरूपं यत्र वेषु नीवारादि
षु चाविशिष्टमिति नत्रापि प्रोक्षणादयः सिद्धा भवन्ति। तस्मात्सर्वेषामेव भूतभव्यद्वाविविनियोगानां द्रव्यादीनां संस्कारैः
अपूर्वभावनाशेषभूतानां तद्विकृतिषु प्राकृतनार्थकारिषु द्रव्यान्तरेषु संकार्येषु हि न प्राः। श्रूयते होमस्कन्दनीया निर्दिष्ट
द्रव्यकरणकत्वाद्दारादुपकारकर इति द्वारायास्तं न स्पन्द्यप्रयुक्तत्वमनन्यकरणत्वं तत्र्यर्थवादेन हेतुरित्युक्तं देशावच्छिन्नपा
शुत्वं नेष्वांस्यान्नस्कृतिर्देशानस्य च तत्र भावात्॥ ज्योतिष्टोमे श्रूयते। स्वरावाणेषापत्तस्य तस्मा यत्किंचित्प्राचीनम

शा॰ ग्नीषोमीयानेनोपांशुचरं नीति। तत्र संशयः॥ किमिदमुपांशुत्वं सोमयागस्य यः प्राग्भागस्तद्धर्म्मः सस्वरमापूर्वप्र
९ युक्तं न तत्र विकृतिषु तद्भागारंभके प्राकृतेपि पदार्थेऽपि न यंउनाऽग्नीषोमीयासशोर्ये प्राचीनाः परार्थोहीत्यणीया
दयः तेषां धर्म्मस्स्वरत्वां नरापूर्वमप्रयुक्तं। न तत्र प्राकृते पदार्थे यूपावटस्तरणबर्हिषि बर्हिर्धर्मवत्तो हि नव्यं इति॥ तत्र
वाग्यमनवत्स्वरत्वानरापूर्वप्रयुक्तत्वे प्राप्ते पूर्वपक्षोऽभिधीयते॥ यत्तस्येति शब्दः प्राचीनशब्दस्य विशेषणं प्रवहितोऽपि प्रवृ
त्तिविशेषकरत्वं विशेषणत्वे स्यात्। स्वराशब्दविशेषणत्वे हि अप्रवृत्तिविशेषकरः स्यात्। तस्मात् तत्रस्य यत्प्राचीनं तदु
पांश्विति संबंधः तत्र यत्र भागधर्म्मता। प्राचीनशब्दोऽपि देशं निमित्तीकृत्य पदार्थेषु वर्त्तमानो वर्त्तते। तथा च सति
प्रथमं देशे वर्त्तितुमर्हति। तदतिक्रमे कारणाभावात् तद्धर्म्म एवोपांशुत्वं। वाग्यमनं तु यत्संयोगाभावात् स्वरत्वान्नरापूर्वप्र
युक्तः। तदिदमुक्तं प्रणीतादिनयेनेति चेत्। न। यत्तस्याश्रुतत्वादिति॥ अथवा अनेन सूत्रद्वयेनाधिकरणान्तरं प्रस्तुतमधि राम
करणसिद्धान्तस्य दृष्टान्तसिद्ध्यर्थं तदीयपूर्वपक्षन्यायेन च पूर्वपक्षं वक्तुमंतरा गर्भिणी न्यायेन विचार्यते। दर्शपूर्णमा ९

तयोः श्रूयते ॥ यज्ञं न निष्पन्नमध्वर्युयजमानौ वाचंयच्छतः । यदध्वर्युयजमानौ वाचंयच्छतस्तत्प्रजापतिभूयं गतौ यज्ञं
तन्वानेन तस्मात्प्रणीताः प्रणेष्यन्वाचंयच्छतीति । तत्रापि वाग्यमः किं परमापूर्वप्रयुक्तः उत प्राप्ता नरापूर्वप्रयुक्त इति संश
यः किं यज्ञभागधर्मोऽयं परमापूर्वप्रयुक्तः उत प्रणीताप्रणयनादूर्ध्वं हविष्कृदाह्वानात्प्रागपि पदार्थाः प्रोक्षणादयः नर
पूर्वप्रयुक्त इति । यज्ञसंयोगाद्यज्ञार्थत्वप्राप्तेः परमः । यज्ञस्यात्र विस्तारेण संबंधो न वाग्यमविषयविशेषणत्वं यज्ञस्य योऽभा
गस्तत्र वाग्यम इति । किं न हि यज्ञं न निष्पन्नं वाचंयच्छेदिति । वाग्यमश्च प्रणिधानेनाविकलानुष्ठानार्थो गंतव्यैरविकलैर्य
ज्ञस्य विस्तारो भवतीत्युपपन्नो यागार्थत्वेऽपि यज्ञसंयोगः । अनन्तरहेतूनां पदार्थानां साक्षाद्वैकल्यकरणेनोपकुर्व
न्वाग्यमस्तदंगमेव स्यात् न भाष्येति ॥ प्रथमं यदुक्तमित्यादिना भाष्ये यज्ञशब्दः श्रूयत इत्यंतेन प्रसन्नभाषणत्वेन
तत्परिहारत्वेन सूत्रद्वयं व्याख्यायतमित्यादिनांतरागर्भिणीत्वेन व्याख्यानं । एवं हि स्थिते नाऽपुनरमित्यादिभाष्यमुप
पद्यते नान्यथा नत्वनमित्यादिना पूर्वव्याख्योक्तयज्ञसंयोगाभावाक्षेपेणांतरागर्भिणीत्वेन पूर्वपक्षमाह यज्ञसंयोगो

त्राप्यस्तीति। उच्यत इत्यादिना सिद्धान्तं दर्शितवान्॥ स्थितादुत्तरमुच्यते यत्तच्छब्दोऽन्तरारब्दविशेषणं अव्यवधानान्न
प्राचीनशब्दस्य व्यवधानात्॥ अपि च भागस्यैकत्वाद्यत्किंचिद्विद्यनेकापत्तेः शब्दो नावकल्पते। तस्मादग्नीषोमीयपश्वाचीना
नामुपांशुत्वं॥ अग्निधर्मः प्रतीष्टकं धानापौर्णमासीवत्॥ अग्नेश्चयने हिरण्यशकलैरग्निं प्रोक्षतीति। किं प्रोक्षणं तावत्सकृदेवस्या
दुत प्रतीष्टकं भेदेनेति। पूर्वेष्टकाद्यतिरिक्तोऽवयव्यग्निशब्दाभिधेयस्तत्र सकृत्। अथवेष्टका एव संहता अग्निधारणार्थे
नस्थापिता अग्निशब्देनाभिधीयन्ते तत्र तदर्थं प्रोक्षणं प्रतीष्टकं कर्तव्यं। यत्रैकावयवाकर्षणेऽवयवान्तरमाकृष्यतेऽसं
धिश्च न दृश्यते तत्रैव देवदत्तघटाद्यवयव्यभ्युपगम्यते न चैवेहैकेष्टकाकर्षणं। संधिश्चात्र पुरीषच्छन्नानामपीष्टकानाम
नुमानेन दृश्यते। तस्मान्नास्त्यवयवी। एकामसंयोगे च न द्रव्यान्तरारंभदृतिकाप्यपीया४ तस्मादिष्टकार्थं प्रोक्षणं प्रसेकं सा
त। नैवमैकबुद्धिरेव हि देशकालादिभेदेष्वबाधितावयविद्व्यसाधनी। सा चेहापि विद्यते। वृक्षादिषु चावयविसद्भावेऽपि आ
कर्षणं न दृष्टमित्यसंतत्रेतद्वयविसद्भावेऽपि संधिदर्शनं च परोक्षो वनैकान्तिकं। तस्मात्सप्तबलानन्यप्रकामसंयोगेऽप्यस्य।

ग्मावयवीति न स्पष्टं प्रोक्षणं सन्नह्य देवकर्मयं। पूर्वाधिकरणे गृहयज्ञभ्याससमुदायात्मकत्वेनातिदेशो मयमयुक्तिभिर्विचारितः॥ स स
मुखापप्रसंगान् प्रोक्षणं विचार्य तद्वदेतिसंगिकी संगतिः॥ पत्नीसंयाजानां तत्वं सर्वेषामविशेषात्॥ द्वादशाहे श्रूयते पत्नी
संयाजान्तान्यहानि संतिष्ठंते न बर्हिरनुप्रहरति असंस्थितो हि तर्हि यज्ञ इति॥ तत्र संशयः किं सर्वेषामह्नां पत्नीसंयाजां
नत्वं उतान्तमस्यैवेति। तत्राविशेषात् सर्वेषां पत्नीसंयाजान्तत्वमिति। असंस्थावचनं गोणं यज्ञस्य चिरसंस्थितेः। स्यादेतत्
असंस्थितो हि तर्हि यज्ञ इति यज्ञस्यासंस्थापत्नीसंयाजान्तत्वे हेतुः। सा च नोत्तमे हनि। तस्माद्धेतुवशात् सर्वेषामेव स्यात्।
अथाप्यय मर्थवादः तथापि वाक्यशेषवशादेवां सर्वत्र पत्नीसंयाजान्तता व्यवस्थाप्यते। अंजनमिव घृतमिति॥ नैवं॥
असंस्थितशब्दस्य चिरसंस्थाभिप्रायत्वेनोपपत्तेर्नाविशेषप्रवृत्तो विधिः संकोचमर्हति। यथा लोके यश्चिरेण भुंक्ते न
त्रयं वक्तारो भवंति नास्य भोजनं समाप्यत इति तथेहापि दीर्घकालत्वात् यज्ञो न संतिष्ठत इति प्रावदतो लाघवार्थं पत्नी
संयाजान्तपरं शेषांगानुष्ठाने स्यादिति विलंबः। स्यादिसिनावानभिप्रायः। तस्मात्सर्वेषां पत्नीसंयाजान्तत्वमिति मासेन

शा. ८अयेस्मिन विधानापमागुनममयं विधिः। मुख्यत्वसंभवाद्वाकमशेषस्यन च गौणता। द्वादशस्यागा८सहकर्तव्यास्त त्र पूर्वे
११ मह८कस्मिंश्चित्सदार्थे वस्याप्यपरमुपक्रमिनवी। नत्रकस्मिन्न पदार्थे वस्यानमिसपेक्षायां पत्नीसंयाजांतानिपू
र्वपक्षाण्यपहानिक्लृप्तेनरमुत्तरमारभेतेत्येवं विधीयमाने येष्मिन विधिर्भवति। चोदकश्चनबाध्येत। शेषलोपस्तु चो
दकबाधेनान येस्मिन श्रुविधीयते। तस्मादयमर्थः८पत्नीसंयाजांतानिसर्वाण्यपहायियाजनाघह८शेषं तं चैणसर्वेषा
मुपरिष्ठादनुष्ठेयमितितस्मात्प्रागुनमानूपत्नीसंजांतनता। तथा चासंस्थितशब्दोपिमुख्यो भविष्यति। अविशेषप्रवृत्तो
पिहि विधिर्वाक्यशेषस्य मुख्यत्वाय विशेषेस्याप्यते किमुत परांतस्यापि न्यायादेव विशेषविषयत्वं। क८पुनरूहोपयो
गश्चिंतायां८। पूर्वपक्षे विकृतिषु नोहः८सिद्धांते द्विरात्रादिषुद्वादशाहविकारेषु यदंत्यमहर्हि नीयंतत्रीयंत्रानंतरप्रकृतौ
पत्नीसंयाजांतनमप्यनुष्ठितमहितासकलमनुष्ठीयते। अभ्यासः८सामिधेनीनांप्रायम्यात्स्थानधर्मः स्यात्॥ दर्शपूर्णे
मासयो८पंचदशसामिधेनीविधाय एकादशर्चं८प्रतिज्ञात्वा८प्रथमामन्वाहत्रिरुत्तमांता८पंचदशसंपद्यंत इतिश्रुतं। राम. ११

तत्र संशयः। किमयं त्रिरभ्यासः प्राथम्यलक्षितायाः ऋचः प्रवो वाजीयायाः धर्मस्तत्कार्यार्थः। स्तनश्चयं तस्याः प्रवो वाजीया
त्रिरभ्यस्तिनव्याउत प्रथमस्थानधर्मस्तत्स्थानगतत्कार्यप्रयुक्तः ततश्च प्रवो वाजीयायाः अन्यापि याविकृतिषु प्रथम
मुच्यते साप्यहे त्रिरभ्यस्तिनव्येति॥ तत्र स्त्रीलिंगनिर्देशादृगते नाभिधीयते॥ तस्या एव त्रिरभ्यासं वैपोत्रधीपते॥ उच्यते
ऋचा प्रथमशब्देन प्राथम्यमभिधीयते॥ आनुकूल्यलक्षणयोग्येन तत्तस्मात्प्राथम्यधर्मता। प्राथम्यैकार्थसमवेतः त्रिरभ्या
सो विधीयते। पञ्चथममुच्यते त्रिरिति। तच्च प्राथम्यमृगाश्रयत्वेनैव मातं। गुणवचनानां च शब्दानामाश्रयतो लिंगव
चनानि भवंतीति नियमानुसारः स्त्रीलिंगनिर्देशः। तत्र प्राथम्यसंबद्धयदमात्रस्य पादमात्रस्य वा त्रिरभ्यासंबंधसंभवान्न
नियमानुसारत्वं स्त्रीलिंगस्येति मंतव्यं। आचारवकार्यसमर्थायाः अनुवचनस्य मासत्वाज्ञा। पंचदशसंपधं नदृतिचबाहा। तस्मा
त्स्थानधर्मः॥ इत्याहतोमया जवदावर्तितारंभणीया॥ दर्शपूर्णमासप्रकरणे चारंभणीयाम्नाता आग्नावैष्णवमेकादशक
पालं निर्वपेत् दर्शपूर्णमासावारप्स्यमानः सरस्वत्यै चरुं सरस्वते चरुमिति। सा किं दर्शपूर्णमासाङ्गत्वेनाथ वर्तेन तदुतं सकृदेवादौ

शा. स्यादिति संशयः। आवृत्तौ हि प्रधानानामंगावृत्तिरसंशया। दर्शाद्यंगमियं न स्यादावर्तेन प्रयाजवत्॥ उच्यते॥ आरंभद्वा
१२ रकत्वेन दर्शांगं साधारणश्च सः॥ तस्य साधारणत्वेन साप्यसाध्यसाधारणी भुवि तु॥ आरभ्यमानसंयोगाद्दारंभांगमि-
ष्टिर्न साक्षाद्दर्शपूर्णमासांगमारंभश्चेदं मया कर्तव्यमित्यध्यवसायः॥ स च सर्वप्रयोगानां साधारणः। सर्वो हि स्वामीना
धायैवम(ध्यव)स्यति यावज्जीवं यो दर्शपूर्णमासौ पर्वणि पर्वणि कर्तेत्यवबिति। तस्मादारंभसाधारणा तदंगभूतान्वारंभणीयापि
साधारणी॥ न च तत्प्रयोगमावर्तनीया। एवं तत्कारमतेनाधिकरणं व्याख्यायतत्रापरितोषाद्व्याख्यांतरं भाष्यकारेणकृतं क
स्य हेतोरपरितोषः। नाध्यवसायवचनोयमारंभशब्दः। प्रथमप्रवृत्तिवाची लोकप्रसिद्धः॥ यद्यपि चाध्यवसायवाची सा
तथापि यदा कार्यमुपस्थितं न तस्यैव तदाध्यवसायो न त्वपावयावज्जीविकाः प्रयोगाः युगपत्स्थिताः। न ह्ययमेकः प्रयो
गोभ्यस्तस्वरूपः। पर्वकालीनं तु जीवनं दर्शानुष्ठाननिमित्तं। तस्मिन्नागते नैमित्तिकं समाप्तं कृत्वा चरितार्थेषु रुषेषु पुनस्तादृ राम.
शनिमित्तवशान्नैमित्तिकमापततीति पुनः क्रियते। प्रत्येकस्मिन् पुत्रे जाते वैश्वानरी निरूप्यपुत्रांतरजन्मन्यपि पु १२

न निर्वपति नाहरेव ननु। तस्मात्प्रतिप्रयोगमध्यवसायभेदात्तदंगमारंभणीयाप्यावर्त्तेतेति न सिद्धांतसिद्धिः। त-
स्मादेवं व्याख्यायते। किमु प्रथमस्याग्न्याधानात्मकस्य परार्थस्सांगमियमुत दर्शपूर्णमासावारंभणीयस्य प्रथमं
प्रवर्त्तमानस्य प्रथमं प्रवर्त्तमानस्य पुरुषस्यांगमिति। तत्र पुरुषार्थत्वपक्षे हि फलति। प्रसज्यतेति नान्वाधानशेषः स्यात्
सत्यारंभो तयोर्मतः। तस्माद्दैतोतदंगत्वदिष्याप्यावृत्तिमश्नुते। प्रयाणवद्भावर्त्तितादेवं प्राप्तेमिधीयते। तत्वत्वारंभशब्देन
पदार्थः कश्चिदुच्यते॥ यदेवत्यप्रवृत्तस्य कर्तुराद्यं प्रवर्तनं॥ तत्रायं वर्ततेशब्दस्तद्योगात्तु पदार्थधीः आरभ्यमानशब्दस्त
त्क्रतुः कृत्स्नस्यैव वाचकः। ल्यट्प्रत्ययोपि कृत्स्नस्यैव तादर्थ्यस्याभिधायकः। आद्या प्रवृत्तिरेकैव बह्वो नैकस्य कर्मणः। प्रथम
प्रवृत्तिविषयत्वयात्वन्वाधानमनेन प्रतिपाद्यते। न कृत्स्ना। न च कृत्स्नसंभवेलक्षणायुक्ता। तस्मान्नाग्न्यन्वाधानेन संबं
धः दर्शारंभक्रतुः पुरुषस्य स्यादन्वाभिहितस्य संस्कारिकेयं आरंभार्थतया ल्यट्प्रत्ययेन क्रियार्थीयां क्रियायामुपपदे वि
हितेनेयं प्रतिपाद्यते। आत्तेन पुरुषार्थत्वेपि फलकल्पना। नचैकस्य कर्मणो बहवः प्रथमप्रवृत्तयः संभवंति। किं त्वेकैव।

प्रा. ननुद्वितीयादीनपि प्रयोगान्सावारंभतएव। सर्वप्रयोगानारभ्यते। ननुदर्शपूर्णमासावारभते। दर्शपूर्णमासारं
१३ भांगंचेयं। प्रवृत्तिश्वारंभो। नचद्वितीयादिप्रयुंजानः प्रथमंप्रयुंक्त इति शक्यतेवक्तुं। तस्मादारंभांगत्वात्तस्यचाप्रसभावादा
रंभणीयानावर्तते॥ अर्थाभिधानसंयोगान्मंत्रेषुशेषभावः स्यात्तत्राचोदितमप्राप्तंचोदिताभिधानात्॥ दर्शपूर्णमासयो
13 र्निर्वापमंत्रः। देवस्यत्वासवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यामग्नयेजुष्टंनिर्वपामीति। तत्रसवित्रश्विपूषशब्दाः किं
समवेतदेवताप्रकाशनार्थास्तत्रश्वविलक्षणाबृहिहितव्याः उताऽसमवेतवचनाः निर्वापविशेषणमात्रार्थाः नोहितव्याइति
। तत्रदृष्टार्थतालाभाद्देवतावाचिताभवेत् निर्वापस्यप्रशंसार्थाः संतोऽदृष्टार्थतामीयुः। सवित्रादिपदैस्तस्मादग्न्यादिरभि
धीयते। अग्निनावाविकल्प्येत सवितामात्रवर्णिकः। उत्पत्तौतद्धितोक्तेन नमंत्रोक्तोविकल्प्यते। वैषम्यान्नसवित्रादिपर
मग्नेश्चवाचकं। मंत्रवाक्यानिचैतानिभिधेरम्नतिदेवतं। जुष्टनिर्वापशब्दौचभजेतामनुषंगितां॥ सर्वेष्वेवनिर्वापेष्वन राम
एकोमंत्रः प्रतीयते। जुष्टादिः सकृदाम्नातो नसहेतानुषंजनं। तस्मान्निर्वापमेवैते प्ररोचयितुमनुष्ठानकाले प्रशंसितुमस्मा १३

शयंनीतिनोहितव्याः गुणशब्दस्तयेतिचेत्॥ तस्मिन्नेव मंत्रेऽग्नयेजुष्टं निर्वपामीत्यग्निशब्दोपि किमसमवेतवचनो
नोहितव्यः उत्त समवेतवचनऊहितव्य इति। ननायंसमवेतोग्निरस्मिन्कर्मण्यिय यपि। मंत्रेत्वत्राग्निशब्दोनसमवे
ताभिधायकः। जुष्टमितिभूतकालनिर्देशादग्निनायत्सेवितंनदृश्यते। नचनिर्वापवेलायामग्निनासेवितंद्रव्यं तस्माज्जु
ष्टशब्दस्तावदसमवेतवचनः। तद्विशेषणंचाग्निपदं। अतोऽसमवेतवचनंसवित्रादिपदवत्प्रसंसार्थंकीर्त्तितमितिसन्
हः। उच्यते॥ नात्रजुष्टस्यनिर्वापोमंत्रेणानेनकथ्यते॥ निर्वापकरणात्वत्रकीर्त्यतेजुष्टभावना॥ नायमर्थः यतः जुष्टंतस्य
निर्वापंकरोमीति। किंतर्हि निर्वापेणाग्नयेजुष्टंकरोमीति। यथाजुष्टंभवतितथाकरोमीत्यर्थः। तस्मात्समवेतवचनत्वाद
ग्निशब्दस्योहः। एवंवापत्सुमुख्यहत्यासमवेतंतवदतियथा धाम्यमसिधिनुहिदेवानितितंदुलेषुधामशब्दः सततुष
द्रव्यवचनः सकिमसमवेतवचनत्वाद्नूह्यः उत्तोत्पदतिसंशयेसमवेतप्रकाशनासामर्थ्याददृष्टार्थोयं। तस्मादनूहः।
लक्षणयानुप्रक्ततिवदुपचाराद्विक्ततिंप्रकाशयन्नादृष्टार्थः कल्पयितुं न्याय्यः। तस्मात्तंदुलानेवप्रक्कतिशब्देनशालयो

शा· भुज्यंनरूनिवन्तप्रकाशयनीतिनरसमयेह विषिशाक्यानामयनेमांसमसीसूहि नव्य माथिंकीचप्रकृतोधाम्यंहाम्ना श
१४ नाह्नसणा।ननुसैववित्तिना।विकृतोल्हसणाकारणा भावान्मुख्य एवमांसशब्दःप्रयोक्तमोनमृगशब्दः। चोदितेनुप
14 रार्थत्वाद्विधिवद्विकारःस्यात्॥ दर्शपूर्णमासयोरिज्ञानिगदेश्रुतंउपहूतामनुष्याःयेयज्ञपतिंवर्द्धानिति।किमेत
घज्ञपतिवृद्धिप्रकाशनेनप्रोत्साहकरणेनन संस्कारार्थसदनेकयजमानकेषुकर्मसूहितव्यंउतेज्ञात्तुसर्थोयज्ञपत्नि
पत्निशब्दोनोहितव्यइति॥ऊज्ञामंत्रैकवाक्यत्वादिज्ञास्तुसर्थनाभवेत्॥स्वामिवृद्ध्यर्थनात्वस्यसामर्थ्येनावगम्यते।वाक्या
तुबलत्वल्लिंगंदृष्टंचेहप्रयोजनं।उत्साहकरणान्तस्तुसामदृष्टार्थत्वमापनेत्॥यजमानेषुबहुषुसर्वसंस्कारसिद्धये॥
ऊहोयज्ञपतीवर्द्धानिसेवंप्राप्तउच्यते॥प्रसङ्गादेववचनादिज्ञेयहूनशेषना॥कृत्स्नस्यनिगदस्योक्तानन्तधपतिनं
ननः।नष्टथग्भवितुंशक्तमतस्तुसर्थतावरं॥वृद्धिप्रकाशनेकत्स्यलिंगेनविनियोजकं।यच्छब्देनचपारार्थ्यंहृद्देःश्रुता राम·
मिधीयते।लिंगाद्यपिनतोद्दृद्देर्नस्वार्थेनप्रकाशनं॥सत्रेषुचैकयजमानवृद्धिप्रकाशनेनेज्ञात्तुनिसिद्धेर्नोहः।पत्रपुनर्य १४

जमानस्य प्राधान्यं न पारार्थ्यं। यथा सूक्तवाकेऽयं यजमान आयुराशास्त इति तत्र भवत्येवोहः॥ तदिदमुक्तं विकारस्तत्प्र
धानेस्यादिति। तदिदं पूर्वस्य परार्थत्वेन हृतास्य प्रसुराहरणार्थं सूत्रं॥ अथवा अधिकरणान्तरं। सूक्तवाके यं यजमान आयुरा
शास्त इति यजमानशब्दः किं सत्रेषूहितव्यो नेति। प्रहरणांगत्वात्सूक्तवाकस्य न ह्यनेनमायुरादिकीर्तनं यत्तत्पतितं यदि
वं तत्खलु समर्थं अनेनेह उच्यते॥ सर्वाण्येतान्यायुरादीनि श्रुतिविनियुक्तसकलसूक्तवाककरणत्वान्यथानुपपत्त्या प्रस्त
रप्रहरणस्य फलानि कल्प्यन्ते। कियानतस्तं बंधि वा प्रकाशयतो मंत्रस्य करणताऽवकल्पते। तस्मात्प्रहरणसाध्यं यजमानफ
लप्रकाशनमस्य कार्यं। सत्रेषु यस्यैव यजमानस्य फलं नोच्यते तस्यैव न सूक्तवाकः करणं स्यात् न च फलमाप्नुयात्॥ त
स्मादूहः। असंयोगात्तत्र स्यैषु न द्विशिष्टं प्रतीयेत॥ ज्योतिष्टोमे देवताप्रकाशनार्थः सुब्रह्मण्यानिगदः इंद्र आगच्छ ह
रिव आगच्छेत्यादिः सोग्निष्टुत्सु निदिष्टस्तत्राग्नेयी सुब्रह्मण्येति वचनादिंद्रपदस्थाने ग्निपदं निक्षिप्यते। हरिवशब्दादि शब्दा
अपि किमूहितव्या नेति संशयः। तदर्थं च किं समवेत न वचनात् नेति॥ न त्वपूर्वयस्ता परपक्षो वा इंद्रस्य हरी सादिभिरेतेगुणा

श्रा· द्रेसंनीतिगम्यते। संति चेत्स्वगुणद्वारेणाइंइमेवैनवहादिशब्दाः। कूहिनव्यादिति प्राप्ते क्रूमः॥ सत्स्वेतेषु गुणेष्वेवं तत्संभावे तु न
१५ +प्रकाशयितुममीषामुच्चारणं दृष्टार्थं भवति। तेनाग्निरपि स्वगुणद्वारेण प्रकाश्यत इति हरिवहादिशब्दानपोद्धसरोहि+ मामा।वा
15 क्यशेषास्त्वदुक्तायेस्तुतिमात्रपराहिते॥ तस्माद्दृष्टार्थेनाविद्यमानैरेव गुणैः संबन्धेनः प्रकाश्यत इत्यग्निरपि तैरेव गुणैः॥ सं
वद्व्यद्सन्तह॥ अथेदमम्नुद्दाहृियते ज्योतिष्टोमे एकहा॥ यथ्यामं त्रः तस्येश्न तं तस्येद्धीसादि॥ समाधस्त्रे त्रिवत्से।
तिदिष्ट॥ किम् हि नव्योनेतिसंशये। पद्येकहायन्यवस्थायां नविद्यं तेश्व तादयस्तथापि भावित्वेनापि नावतसंभवद्धि॥
स्वगुणैरेकहायन्येव प्रकाश्यते दृष्टार्थत्वात्। त्रिवत्सेतु अभावादहू॥ नेतदेवं कर्म्मागभूतायामेकहायन्यवस्थायां नाव
नसंसेव। भावित्वमपि नैकान्तिकं। मरणसंभवात् अतोयथा कथं वित्प्ररोचनार्थं कीर्त्यते। नावश्वसांडेपिसंभवति। संभ
वति। सांजदपियागौर्जनिष्पतेतस्माएतेऽवाप्यमानाः सांजदेवाप्याभवंतीति तस्मादन्हू॥ लिंगविशेषनिर्देशात्स राम·
मानविधानेष्वभासासारस्वनीत्स्वीत्वात् ज्योतिष्टोमे सवनीया॥ पशवः आग्नेयमजमग्निष्टोम आलभेतैष्टं द्वाग्नमुक्थ्य १५

द्वितीयमैंद्रंद्वाम्निंषोऽपि निनितनीयं सारस्वतीमेषी चतुर्थीमतिरात्र इति। नत्र पशुधर्माः यत्रा सर्व्वेषां साधारणास्तत्राकि
मग्निगुवचनं मेष्यां भवतित्तनेनेति संशये प्रकरणविशेषात्प्रास्मा अग्निंभरनेति च पुंल्लिंगस्यास्मै शब्दस्य नियत
लिंगपशुशब्दाभिधेयपशुत्वाभिप्रायेण प्रास्मै पशवे इसेवं स्त्रियामपशुपपत्तेर्लिंगविरोधाभावात्तस्यामपिस्याद्
ध्निगुवचनमिति प्राप्तेऽभिधीयते। पशुशब्दस्य तावदेवं भवेन्नत्विह सः ॥ अतः तस्माद्योगकाले यदपरोक्तं तस्यास्मि
नं प्रयुक्तं नत्र प्रयुक्तोऽपि पुंल्लिंगं वदितुं क्षमः ॥ न स्त्रीद्रव्यमतो मेष्यामशक्तेर्न प्रवर्तते॥ तेन सामान्यमविध्य पूर्वपक्षेऽध्नि
गोमैष्यामप्रवृत्तिः ॥ सिद्धांते त्वग्नीषोमीयार्थद्वैतो मोणामतिदेशेन पशत्वनरगमनाहूतेन प्रवृत्तिः ॥ आम्नानादस्य धिका
रे वचनानद्विकारः स्यात्॥ साम्नामिदानीमूहमारिसमानस्तऽपोह्नानं चिंनयति। नानिस्त्यक्षरांतरेषु समाम्नानानि अक्ष
रांतरेषूत्संने। तत्रेन त्रेह गिरापरगीनेरिरापरे स्थानापत्त्या प्राप्तिं वकुं स्थानापत्तिमेव चिंतयति। ओतिशोमेयज्ञापज्ञीये।
श्रूयते। नगिरागिरेति श्रूयाद्रैरं कृत्वोद्गेयमिति। किमिरापदस्यागिरापदस्थानापत्तिः पाक्षिकी। गिरापदमिरापदं वाभये।

श्रा. न्कथं। उच्यते नियमनात्स्यान्नापत्तिरिरापदमेव प्रयोजकत्वमिति॥ नन्वैरापदमात्रत्वेनैव विधीयते। नो ह्यानसंबंधस्तोत्रसंबंधो
१६ वा। प्रकारणानुस्तोत्राङ्गतां भवति। तदंगभूतस्य च तत्साधनभूतयज्ञायज्ञीयगानसंबंधः प्राप्तएवानूद्यते। ततश्च कालि
निकमेव स्तोत्रांगत्वं गानसंबंधश्च। गिरापदस्यापि चास्येव कालं निकमंगत्वमिति विशेषाद् भयोर्विकल्पः। नैतदेवं इरापदस्य
16 हि प्रकरणासनाथया ऋक्साऽग्निष्टोमस्तोत्रसाधनभूतो ह्यानसंबंधित्वेन विधीयमानस्य ऋक्सागानसंबंधः। प्रकरणा
च्च स्तोत्रांगत्वं। गिरापदस्य तु प्रगाथैकवाक्यतया गानसंबंधः स्यात्। क्रमाच्च स्तोत्रांगत्वं। स्तोत्रक्रमेण हि अग्निष्टोम प्रक
रणे पठ्यमानायां स्तुयज्ञायज्ञीयप्रगाथो अग्निष्टोमस्तोत्रक्रमेयष्टुतदतिनरेकदेशस्य गि(पद)रास्य गिरापदस्यापि क्रमात
दंगत्वस्या। क्रमाच्च प्रकरणं बलीयः। श्रुतिश्च वाक्यात्। अपि च गिरापदस्याम्नानमात्रं न विधिः। इरापदं तु प्रसक्तविधि
विहितं। अतोपि बलवत्। ननु च यज्ञायज्ञीयेन स्तुवीतेति प्रसक्तमेव यज्ञायज्ञीयं स्तोत्रांगत्वेन विधीयते। सत्यं साम्नः राम
प्रसक्तः। ऋचस्त्वनुपपसा। कथं। एतदेव हि साम्नस्तुतिसाधनत्वं। यदृङ्णामिधानपराणामक्षराणामभिव्यक्तिः। अतो १६

यज्ञायज्ञीयेन स्तुवीतेत्यस्यायमर्थः। यज्ञायज्ञीयाभिधम्नेऽग्नेर्गायत्रे स्तुवीतेति। तत्रापि समाम्नानसिद्धाक्षरव्यक्तिरेव
सति संभवे अंगीकरणीया। नाभ्यकल्पनं युक्तमिति। यज्ञायज्ञीयप्रगाथस्यैवायं स्तुतौ विनियोग इति प्रकल्प्यते। तत्रापि सर्व
पदानां साधारण्येन विनियोगो न विशेषतो गिरापदस्यैवा इरावदस्य तु साक्षाद्विशेषरूपेण विनियोग इति वक्तव्यता।
अप्रगाणाद्वाव्यत्वेनयात्मनोपदेश्यात्।। नियतमिरापदमिति स्थिते किं तत्प्रगीतं प्रयोक्तव्यं उताप्रगीतमिति सं
शयः।। तत्र तत्र प्रगाणाभावे कस्मात्प्रगीतस्य चोदनात्।। प्रगीतात्तद्धितो वायीरीयं प्रसज्यते।। यदि नावैरमितिस्वा
र्थेतद्धितः ततः इरां कृत्वोद्गेयमिति सेनावानर्थः स्यात्। अप्रगीतात्तत्खल्विरापदार्थं तद्धितः। प्रगीतात् उत्पन्नेऽग्रहं ता
लव्यं प्रथमस्वरं चेत्सेवमिकारस्यायीभावे सति ऋद्धाद्धइतिच्छप्रत्ययो सति रायीरीयमिति रूप्यापि प्रगाणाप्रगाणयो+
+रुभयोरप्यक्षरविकारत्वादन्यतरावधार+पंस्यात्।। ऐरमिति रूपमप्रगीता। दुस्तत्रोसिध्यति।। तस्मात्प्रगीतस्या
पदेशात्प्रगाणां। अथापि विकारार्थीयं तद्धितः नैणप्रमाणमन्यतरत्वेन तथ्यैरापदे विहितेयस्मात्प्रगाणामप्रगाणां

ग्रा. वानस्यैवायमनुवादइत्यापद्यते। नहि विधिनाचाप्रगाणमेव प्राप्तं नयाभूत्तस्योपदेशात्। तस्मात्प्रगाणं उच्यते॥ गिरा
१८ पदस्य यत्स्थानं तत्र हीदं विधीयते। इरापदमन्तस्तस्य पाणी निस्तास्तभेन ननु। समस्तप्रगीतानां हि तो न त्वप्रगाणां वि
धीयते। यदात्तरविधिपरं हीदं वाक्यं। नाप्रगाणां प्रगाणं वास्पृशति। ननु पदांतरं गिरापदस्थानापन्नातन्त्रीतिं लभमानं
नकेन चिद्वार्यते। यज्ञायज्ञीयसाध्या हि स्तुतिः समस्तं च सामयज्ञायज्ञीयं। नैकदेशविकल्पं। तत्र गिरापदे पदांतरोप
देशान्निवृत्तेयस्तत्र नेगीसंश्र ४ सगेयमपस्तने। इरापदमपि सामसाध्यैस्तवे सामसंस्कार्यतामंतरेण साधनीभ
वितुमशक्तं संस्कारकं सामांशमपेक्षते। तयोर्नष्टाश्वरथरथवत्संबंध ४ तस्मात्प्रगीतं प्रयोक्तव्यं॥ इति शाबरदीपि
कायां नवमस्याध्यायस्य ४ पाद ४॥ ॥ सामानि मंत्रमेके स्मृत्युपदेशाभ्यां॥ सामशब्दस्तु हि विशेषवचनाश्वरथंतरादिश
ब्दाः न प्रगीतस्य मंत्रस्य वाचकाः किंतु गीतिमात्रस्यैवेति समेयद्युक्तं तदेव दर्शयन्नर्थविप्रत्यायस्मार्यते। एवं वा
॥ योयमूहो नाम ग्रंथविशेषः छंदोगेषु पठ्यते कायानश्चिदत्र आ भुवो वाहस्यादिः। स किं निसोऽयानिसोवापोरुषे राम. १८

17

पद्यते। कर्तृस्मरणाभावाद् अध्यायाद्याचारात् शुश्रूषाराधितगुरुमुखाच्च प्रतिपन्नैर्वेदत्वप्राप्तावुच्यते। ऊहस्समाख्या
नादनित्यत्वात्। न स्वाध्ययनसिद्धस्याहत्वं घटते। किंच॥ पद्योन्यायेन तु तत्रयोगाध्ययनीयसनिर्देशवचनाद्योनावध्ययनसिद्धस्या
न रपोरनुष्ठानावगमात्सौरुषेयत्वं विस्पष्टं। नहिनित्यस्वप्राधीनस्य पद्योन्यायेन तु तत्रयोरिनिवारोपपद्यते। कर्तुस्त्वस्मरणा
मन्नादरादप्युपपद्यते। न सत्र पुरुषप्रसयाधीनमनुष्ठानं। वचनादेवोत्तरमार्गो न सिद्धः। अकसामानां च रथकृद्रथकृद्वेद
लात्त्वपि सत्समस्य पौरुषेयत्वे ऽध्यायाद्याद्दर्शनात्। तस्मात्सौरुषेयत्वात् न्याय्यं संगृह्यान्याय्यं स्तक्यमिति न्यायनः कीदृश
मनुष्ठानं भवतीति चिंतनीयं॥ कर्म्मवाविधिलक्षणं॥ सामानिक्कि मृत्वं प्रतिप्रधानमन्त्रानुनन संस्कारार्थानि गुणभ
नानीति विचारः॥ नत्राकर्म्मकालप्रयोगान्त प्राधान्यं। संस्कारार्थत्वे त्वसराति व्यक्तिरेषां कार्यस्यात्। सा च कर्म्मकाल एवो
पयुज्यत इति अकर्म्मकाले प्रयोगो न स्यात्। ननु वचनादकर्मकाले गानं भविष्यति। गर्भाष्टमे वर्षे उपनयीत श्रावण्यां पौर्ण
मास्यामुपाकृत्य स्वाध्यायमधीयीतेति। एवं नत्वर्थदृष्टार्थत्वे वचनाद्वाप्युपपद्यते। न त्वकर्म्मकाले प्रपुंसामकर्म्मोपयिकीमधि

शा. व्यक्तिमलं भवतिकर्तुं। अथादृष्टरूपः संस्कारः ततो ऽ कर्म्मकाले संस्कृतानां कर्म्मकाले पुनः संस्कारोनर्थक इति क्रतुमध्ये
१८ सामानि न प्रयुज्येरन्। अथा कर्म्मकाले प्राधान्यं कर्म्मकाले तु संस्कारः न दर्शवैश्यं। तस्मात्प्रधानकर्मसाम। बहिः प्रयोगः फ
18 लार्थः। क्रतुमध्ये तु क्रतोरारादुपकारक इति माधव उच्यते। अक्षराणामभिव्यक्तिः सामां दृष्टं प्रयोजनं। अक्षरैश्चाप्य
भिव्यक्तैः स्तुतिः क्रत्वंग चोदिता। एवं दृष्टफले लब्धे नादृष्टफलकल्पना। ननु चाविनियुक्तत्वादक्षराणां न संस्क्रिया
।सक्तूनामिव होमेन नैवं दृष्टफलेत्वनः। प्रयोजनं न सक्तूनां दृश्यते श्रूयतेपि वा। यथोक्तं भाष्यकारेण न होमसंस्कृता
नां सक्तूनां प्रयोजनं श्रूयते। नापि दृश्यत इति। दृश्यते त्वक्षराणां प्रयोजनमिति वैषम्यं। प्रयोजनवत्वं संस्कार्यत्वे हे
तुर्न विनियोगः। तथा चग्रहणावेक्षणासम्मार्जनानामविनियुक्तानामपि मंत्रप्रकाशनसंस्कार्यत्वमिष्टं। अपि चो
तरागं प्रत्यक्षत्वर्थे न स्तोत्रकर्मेणर्चां पाठादस्यैव विनियोगः तस्मात्संस्कारकर्म्माणि सामानीति। अथ त्वकर्म्मकाले गानं राम.
वा वनिकं तच्छिक्षार्थं रथ्यहस्त्यादियोग्यादिवत्। न चैतस्याः श्रुतिनिर्देशात्। एकं साम तृचे क्रियते स्तोत्रीयमिति श्रू १८

यते। तत्र संशयः किंयासज्यतिसृषुगानमुत प्रत्यृचं परिसमाप्तमिति। तदर्थं विचार्य्यते। किमिदं त्रित्वं सामनिर्वर्त्तस
गुणतस्तोत्रांगमिति। तत्र सामक्रियतइत्यस्यैवं सामनिर्वर्त्तितिनुच्यते। तामुद्दिश्यर्गतं त्रित्वमंगत्वेन विधीयते॥ प्रधानभू
तानामप्यृचामार्थिकं सामसाधनत्वमस्त्येवेति तद्गतस्य त्रित्वस्य युक्तमिव सामांगत्वं। वचनबलाच्च प्रतिप्रधानावृ
त्तिं बाधित्वाप्यासज्यगेयं नहि प्रत्यृचं गीयमानस्य त्रित्वमंगभूतं संपादितं स्यात्। क्रियतइत्यसनेनाभ्यासलक्षणोऽस्याप्र
त्यृचं गानं। तस्मादासज्येति प्राप्ते ब्रूमः। स्तोत्रीयस्य हि साम्नोऽत्र तच्च संबंधउच्यते। स्तोत्रसाधनभूतं च स्तोत्रीयमिति
भण्यते॥ साम्नस्तोत्रांगभावश्च स्तोत्रसाधनसंस्कृतेः। स्तोत्रसाधनतावृत्तौ प्रसेकं न तु संघशः॥ यदि त्रित्वसंपादनाय
आसज्य गीयेत ततोऽरथंतरं पृष्ठं भवति यज्ञायज्ञीयं तस्कृवीतेत्यादिभिर्यत्साम्नां स्तोत्रसाधनत्वं विहितं तन्न घटते। स्तोत्र
साधनभूतशब्दाभिव्यक्त्यनुयन्त्यावत्साम्नां स्तोत्रांगत्वं। वाक्यं च स्तुतिबुद्धेः साधनं। न वाक्यसमुदायः। तस्मात्प्रत्यृचं गेयं। एवं
च त्रित्वं सामांगत्वेनाघटमानं स्तोत्रसाधनपरिच्छेदेन विधीयमानं स्तोत्रस्यैवांगत्वेन विधीयते। नह्यविधानेन प्राप्तं तिसृषु

शा. गानंतचेक्रियतरस्यनेनानूपनेअनुवारत्वाच्चकरोतेरभ्यासलक्षणानदोषाः॥ नरभ्यासः समासुस्यात्॥ निस्पृष्टप्रश्ने
१५ कंगीयमानेकिमनियमेनसमासुविषमासुवासुगेयमुतसमच्छंदस्कास्वेवेतिसंशयेविशेषाश्रवणादनियमः॥ संशय
विश्लेषपरिहारायतुसमासुवैस्यात्॥ नैमित्तिकंत्वतरार्थमानमंतर्याख्यनीयेत॥ यद्योन्यांतरुत्तरयोर्गीयतेसत्रसंशयः
किंयोन्तुत्तरयोरुत्तराग्रंथाधीनयोर्वागेयंउतोत्तराग्रंथाधीनयोरेवेति। तत्रोत्तराशब्दस्यसंबंधिशब्दत्वाद्वयोनःय
रतःपरतःपठितासैवोत्तरा।ततश्चयोनिपाठापेक्षयारथंतरयोनेःपरतोबृहद्योनेःपठितत्वात्तस्यागानं।उत्तराग्रंथे
तुरथंतरयोनेःपरतोनत्वात्तांअन्यादिषुरस्यस्याःपाठात्तस्यागानं।अतोविकल्पः॥ द्वयोरपिरथंतरयोन्यपेक्षयोत्त
रत्वादितिप्राप्तेब्रूमः॥ यद्यप्येवंसंबंधिशब्दोलौकेतथाप्युत्तराग्रंथेणाप्रसिद्धिः। तत्रसंज्ञाशब्दस्यान्यानपेक्षवृत्तित्वा
त्तापेक्षत्वेनसंबंधिशब्दाद्बलीयस्त्वं। उपक्रमपाठाच्चउत्तराग्रंथःकृत्स्नं। तस्मादुत्तराग्रंथाधीनास्वेवगेयं॥ एवं
वा।द्वादशाहेपार्ष्ठिकंचतुर्थमहः। एकविंशःषोडशीवैराजसामेतिश्रुतं। तत्रचचैरोकंनामब्रह्मसामातिजगतीषुस्तु। राम १५

वतइति श्रूयते। तच्चाग्निजगत्सामसु सत्त्वं विश्वा ०१ तत्रानाइति। उत्तरे द्वे बृहत्सौ ते भिन्नमंति वस्तसे साधे। तत्र तच्चेगाने
क्रियमाणे संशयः॥ किमग्निजगत्सौ द्वे आनीय समासु गानं उत बृहत्सावेवाशाय विषमासु गानमिति। संशयरविश्लेशयरिहा
रापाग्निजगतीषु सुवहुत्वानुग्रहाय समासु गानं। बृहत्सोऽस्तु तराग्रंथ पठितयो ४ कृतवर्णत्वान्न तु परित्यागे तयोरानार्थे
क्यादेकविसंशे यतत्ये चैकैकस्याम् विसत्कृत्वोऽभ्यस्य मानाया मभ्यासपेक्षयाग्निजगतीवहुत्वादनुवादसरूपस्यवर्त्तमा
ननिर्देशस्योपपत्तेर्विषमासु गानं॥ प्रागाथिकं तु॥ ज्योतिष्टोमे बृहद्रथंतरे बृहत्सोऽनुत्पत्तेऽग्निबाम्भरनोनुमस्त्वामिद्धि ह
वामहइति। तयोः पंक्तौ उत्तरे नत्वावां अन्योदिर्यो नयार्थिवः सत्वं नश्चित्रेति। तत्र श्रूयते नवै बृहद्रथंतरमेकं छंदो
यत्तयोः पूर्वां बृहती ककुभावुत्तरे इति। तत्र किं पंक्तीयरिसज्यद्वे द्वे ककुभावानेतव्ये उत तयोर्निमुत्तरांवप्रगन्ध्य ककु
भावुत्तरे संपादनीये इति संशयः। तत्र प्रगन्थनेन मुख्यककुसंपत्सभावाद् क्षर सामान्यमात्रेणागेणात्वापत्तेस्त्वचगा
नस्य चर्क्षेयमंतरेण सामंजस्यादृस्यासां ककुभामानयनं। उच्यते। प्रगाथस्मरणात् प्रगाथसमाख्यानात् संकेतनराते

श्वा।

श्या. नयाऽस्यास्तंनानेर्येक्यापानासाद्युनरारभनइतिवद्दर्शनानन्तचगानस्यचसामान्येनविहितस्यात्रप्रगाथेप्यसंन
२० होषाभावात्सग्रथनं। एवंवारोरवयौधाजयेवार्हतेतत्त्वेभवत।४ नयोश्चपूर्वाद्बृहती उत्तराविष्टारपंक्तिरिति। तत्रापिपू
र्ववदुत्सतिरहसावानीयत्वचसंयारनं। मुतपठितयोरेवप्रग्रथनमिमिसंशये। नत्रैवविशेषनस्त्वेभवेमइतित्वचश्र
वणाद्न्यागमनं। प्रगाथस्मरणासमाख्यानरायाऽलिंगदर्शनेत्तुप्रग्रथनं। एवंवा॥ श्यावाश्वांधीगवेआनुष्टुभेतत्वे
भवनइतितयो।४ पूर्वानुष्टबुत्तरेद्वेगायत्र्योतत्राप्यनयोरनुष्टुभोरागमनं पठितानामेववाग्रथनेनानुष्टुप्त्रयं
सपाघमितिविचारः लिंगांतरमदर्शनार्थत्विदंव्याख्यानांतरंनतुकाचिदधिकाशंकास्ति॥ एवंवा॥ गवामयनेश्रूयते
चतुःशतमैंद्रावार्हता४ प्रगाथाइति। तत्रकिंतिसृषुश्चसुगानमुतद्वयोर्द्वयोः प्रग्रथनेनेतिसंशयेतत्त्वप्रापिचोर
कानुग्रहायतिसृषुस्या। तग्रथनेहितसमजसंतत्त्वतं। असतिप्रग्रथनेकथंप्रग्रथनेकथंप्रगाथवचनं ऐंद्रा राम
वार्हता४ प्रागाथाइति। श्रकूभयथनाभिप्रायमितिब्रूम४। प्रथमेतत्वेगीत्वातस्मात्तत्वाद्वेवेकाम्तचमुपादायाप २०

रेद्धे ऋचो गृहीत्वा गीयते। पुनरप्येवं। न या सति न्यूनगानं प्रमाय शब्दश्चोभयमनुगृहीतं भवति नैन नरेवं। अन्या अन्या ऋ-
चो भवंतीव चनान्नैकस्याम्चि द्विर्गानं संभवति। तस्माद् द्वयोः प्रग्रथनं अर्थैकत्वादिकत्वादिकल्पस्यानुच्छांदोग्ये नत्व
कारादि सस्त्वसाम शाखागतानां गीतिप्रकाराणामेकार्थत्वाद्युपगमस्य योगासंभवात् तरनुरोधेन च सामावृत्तेरन्याय्यत्वा
त्सिद्ध एव विकल्पः साम प्रसंगाद्विस्पष्टीकारायदर्शितः अर्थैकत्वादिकल्पप्रसादृग्सामयोस्तत्परत्वात्॥ क्वचिद्विकृति विशेषे
कानिचिद् ग्राकृतानि स्तोत्राणि विहितानि तेषां च न प्रकृतितः किंचित्साधनं प्राप्तानि। प्राकृतानां गायत्ररथंतरादिसाम्नां प्राकृ-
तीष्वेव बहिष्पवमानादिस्तुतिषु निबद्धानाम प्राकृतेषु प्राप्त्यभावात्। तेन तानि साकांक्षाणि तत्रेदं श्रूयते। यदृचा स्तुवते
तदसुरा अन्ववायन्यत्साम्ना स्तुवते तेन रसुरा नान्ववायन्य एवं विद्वान्साम्ना स्तुवीतेति। तत्र ऋक्शब्देन प्रगीतऋ-
क्परं प्रगीतायाः सामोपदेशेनैव सिद्धत्वात्साम्नास्वरान्तिव्यक्तिद्वारैव स्तुतिः क्रियेते। न साक्षात्तेन साम्ना स्तुवीतेति सामाभिधा-
ने ऋग्गतस्वरैः स्तुवीतेत्यर्थः। एवं चेदप्रगीतपरमृग्वचनं। तत्र संशयः किमृचा साम्ना वा स्तोतव्यमुत साम्नैवेति। द्वयोर्वचनाद्विकल्प

श्रा. म्नाताच्युते। साम्नःउपसंहारे विस्पष्टप्रशंसावचनं न विधेयत्वावगमादृक्कीर्तनमसुरागमनिंद्यासामप्रशंसार्थं तस्मात्ता
२१ म्नास्तोतव्यं एवं वा। सामवेदे किंचित्सूक्तसअयंसहस्रमानवद्नीयंप्रगीतापिपठिता। अप्रगीतापि। तत्र श्रूयते। अयंसह
स्रमानवद्रसेनयाहवनीयमुपतिष्ठत इति। तत्र प्रगीतया ऽप्रगीतया वोपस्थानमुत प्रगीतयैवेति विचारे विशेषाभा
वाद् नियमः ४ अप्रगीतायाः ४ प्रगाणार्थं४ या ०४। नद्युनवधारितस्वरूपायांसुखं गानं संभवति। प्रगीता त्वनन्यार्था। तेन
साप्रयोजनपेक्षमाणाऽऽक्रतुनागृह्यते उपस्थाने च विनियुज्यते। एतयेति सर्वनाम्नापरामृश्यते। तस्मात्प्रगीतैव ग्रा
ह्या। एवं वा साम प्रसंगान्मंत्राणां स्वरश्चिंत्यते। मंत्रा हि ऋक्चित्रैस्वर्येणाधीताः ४। ऋ विज्ञातुःस्वर्येण। तत्र कर्मसु किं त्रैस्वर्य
चातुःस्वर्ययोः समुच्चयः। अथ विकल्पः। अथोभयहाने नैकश्रुत्या प्रयोग इति संशयः। तत्र समुच्चय इत्युपक्रममात्रं।
गीत्युपायवन्निरस्तत्वात् नद्द्वैवनु विकल्प इति पूर्वपक्षः। नानो यज्ञकर्मणीति स्मृत्यनुमितादृचनाद्वैकश्रुत्यं। अथर्वग राम.
मार्य्यनुस्वराध्ययनं। स्वरविशेषाधीनत्वादर्थविशेषाणां। बहुव्रीहौ प्रकृत्या पूर्वपदमित्यादिवचनात्। तस्मात्तानेन प्रयोगः। साम २१

प्रदेशे विकारस्तदपेक्षः सान्निध्यात्मकत्वात्॥ उपोद्घातं समाप्य प्रकृतमिदानीं साम्नामूहं चिंतयति। रथंतरमुत्तर
योर्गायती सा ऋग्भिः ऋग्गं तदरेगीयमानानि सामानि किमूह्यानि नेति। यदि योनिवर्णावशेन गानं यस्मिन्प्रदेशे
योनावायीभावः तस्मिन्नेवोत्तरयोरपि संध्यक्षरे उत्तरयोरायीभावस्तनोनोहः। अथ तूत्तरावर्णवशेन गानं। यस्मिन्प्रदेशे संध्यक्षव
शेनायीभावो योनौ न तु। प्रदेशान्तरे यत्र संध्यक्षरं तत्रायीभावः। तत उहः। किं प्राप्तं। योनिवर्णवशेन। कुतः। योनावेकारं निव
र्त्याकार इकारश्चोच्चारितः। तत उत्तरयोरपि तद्गायति तं वर्णं निवसांकारावुच्चार्यौ। किं च नात्र कार्यमुखेन साम्नः प्रा
प्तिः रथंतरादिस्वरूपस्यैवातिदेशात् तेन तद्गामाय पूर्वपक्षन्यायेन सामस्वरूपमुत्तरयोः प्रापितमविकृतस्वरूपमेव स
मान्नातमप्राकृतं दृष्टमदृष्टं वा कार्यं कुर्यात् तस्मान्नोह इति प्राप्ते ब्रूमः यद्यप्येकारं तु दत्ता ऽवर्णे वर्णावुच्चारितौ न
तो भवे तु यथाभवानाह। न तेन तर्हि एकारो नाम न वर्णान्तरं। अवर्णेवर्णौ संहितावेभावमापन्नावायीभावे न विश्ले
षितौ दर्शितौ। प्रसंख्यवर्णे वर्णौ वैकारे प्रसभिज्ञायेते। तस्मादुत्तरयोरप्येकारत्वमत्रत त्रस्योप्यायीभावे न विश्लेषणीयः।

रा. एवमृगक्षराभिव्यक्त्यास्तोत्रंसाम्नासंपद्यते।नान्यथा।यद्यपिचसामस्वरूपस्यातिदेशस्तथापिस्तोत्रसाधनतयातिदि
२२ श्यते।एकंसामतृचेक्रियतेस्तोत्रीयमितिवचनात्।स्तोत्रसाधनताचाक्षराभिव्यक्तिद्वारा।नचसंध्यक्षराद्यन्यस्यापीभावः
क्रियमाणोक्षराण्यभिव्यक्तिंकरोति।एवंसर्वत्र।तस्माद्योनिवर्णोवशेनागानाद्रस्लृद्ः साम्ना।स्तोभस्यैकेद्व्यांतरेनिरतिमग्व
त्सामातिदेशेकिंस्तोभानामतिदेशास्तितेतिसंशयेसामभ्योभिन्नत्वात्स्तोभानामृगक्षराणामिवनातिदेशः।४भिन्ना।
नामपियोगीनिकालपरिच्छेदेनसामांगत्वात्तदतिदेशादेवातिदेशः।सामानिहियोनैयेनाशेनभक्षराण्यभिव्यजंतितेनद
ष्टमेववस्तुतेरुपकारंकुर्वंति।स्तोभाक्षरनिर्वर्त्यैनत्वंश्येनस्तुसोयपियकमेवादृष्टंकुर्वंति।नपदिस्तोभानातिदिश्येरन्तत्रिवर्त्यस
स्यगीसंशस्यलोपात्तत्कृतोपकारस्पहान्यावैगुण्यंस्यात्तस्मादतिदिश्येरन्।ऋगक्षराणांतुप्रधानत्वात्साम्नःशादतिदे
शः।अधिकंचविवर्णेचजेमितिस्तोत्तशब्दत्वात्।।प्रसंगात्स्तोभलक्षणमुच्यते।यदृगक्षरेभ्योऽधिकंविवर्णंचतत्स्तोभ राम
शब्देनोच्यते।।धर्मस्यार्थकृतत्वात्तद्वृध्युणविकारस्पतिक्रमप्रतिषेधेचाद्दनानुवंधः।समवायात्।प्रकृतौभीसादि २२

पुरुष्कृताऽमोक्षणावघातादिरूपो न तत्स्वरूपमयुक्तास्तन्मात्रपर्यवसायिनः। किंतु व्रीहिभिर्यजेतेत्यादिविहिताधनविशेष
द्वारेण पूर्वभावनार्थाः। तथाहि आग्नेयोऽष्टाकपाल इति पुरोडाशद्रव्यकोऽग्निदेवतायोगो विहितः तदनुवादेन व्रीहयो वि
हिताः पुरोडाशमकृतितंप्रनिपद्यंते। न ह्ययमर्थः व्रीहिभिःपुरोडाशं कृत्वानेन यजेतेति। ननु पुनराहार्यैर्यजेत नान्
व्रीहीन्प्रोक्षतीति। ननु अवसवैरुपसंह्रियमाणैरयमर्थः संपद्यते। प्रोक्षणसंस्कृतैरवघातवितुषीकृतैश्च व्रीहिभिः पु
रोडाशं कृत्वानेन यजेतेति। अयमेव वाक्यार्थः पारमार्थिकः। व्रीह्यादिवाक्यार्थाः अस्यैवोपायभूताः पदार्थस्थानीयाः। ए
वं चैदाग्नेयभावनायाः शेषभूतः प्रोक्षणादीसंभावस्तद्धिकारेष्वनिर्देशेन नीयते। तत्र नैवारे चरौ पुरोडाशस्थाने चरौ नि
वेशाद् व्रीहिस्थाने च नीवारनिवेशादिन्तरस्य समस्तस्य यथातिदेशमवस्थानान्नैवारं चरुं निर्वदाग्नेयवदित्यस्य श्रुतानुमिते
कदेशनिष्पन्नस्य नैवारस्यानुविधेरयमर्थो भवति प्रोक्षितैरवघातवितुषीकृतैर्नीवारैश्चरुं कृत्वानेन यजेतेति। तेन व्रीह्यादि
स्थानापन्नेषु नीवारादिषु सिद्धऊहः स्थानापत्तिस्तु कार्यवगम्यते इह समस्य प्राकृतस्य कार्ये वर्तेत इह समस्येति तस्य दर्शना।

शा· र्थमिदमधिकरणं॥ तत्र पर्वेषु स्ववारी नीवारमप्यश्ननन्तस्य परिधीरापदानां व्रीहिषउहोलूखलमुसलयूपगिरापदस्याना

२३ पत्तौ प्रमाणमपश्यन्नतेषु तेष्टमीभवंतीतिमन्यते। सिद्धांतस्तु नीवाराणां नावत्स्यस्य स्वमेव व्रीहिकार्ये तंदुलनिर्वृत्तौ सा

मर्थ्यं। सामर्थ्यानुसारी च शास्त्र इति नैवार इति नहि तो विकारार्थ इति निश्चीयते। चरुश्चरुदेवतासंयोगात् पुरोडाश

स्थानापन्न इति तस्य कृति भूतानीवाराः व्रीहिस्थानापन्ना भवंति। तथा मध्वशनं षउहाभावे। तत्कार्यस्य साधनापेक्षा

यां विधीयमानं कार्यापेक्षं स षउहकार्यमेवावलंबते। इदं च षउहाभावे मध्वशनं विधीयत इति कृत्वा चिंतितं। तेनाभा

वे विधिरपि कार्याय तत्प्रमाणं तथा नैर्ऋतश्चरुर्नखावभिन्नानामिति किं नखैरवहननमन्यन तुःषविमोचनार्दतो न

खानामुलूखलमुसलकार्यापत्तिः। परिधौ पशुं नियुंजीतेति विस्पष्टमेव यूपकार्ये नियोजनेन परिधिर्विधीयते। तथाय

स्तंति षिध्यय हि धीयते न गिरा गिरेति ब्रूयादैरं कृत्वोद्गेयमिति। तस्यापि तत्कार्यापत्तिः। गिरापदे हि निवृत्ते तत्कार्यं सा राम

धनमपेक्षते। इरापदमपि विधीयमानं कार्यापेक्षं गिरापदकार्येण साधनापेक्षेण संबध्यत इति गिरापदस्थानाप २३

र्थमिदमधिकरणं॥ नत्र पूर्वविसवारी नीवा) तमिदापरं नत्संस्कारिकांगित्तिं लत्तेभे। नतु सनेस्तु निर्दृतिसत्कृनत्वात्सा
त्वापरिधौ पुनरासेपः नीवारादयो हि कार्यार्थनया विधीयमानाः पुकं यत्कार्यार्थान्व्रीहि धर्मा१२ भंते। परिधिः पुनरग्नि
परिधानार्थेनो सन्नो न नियोजनार्थेन। परिधानार्थएवतु तस्मिन्नचनास पशुर्नियुज्यते। प्रकृतौ। चकार्यार्थी धर्मास्त्वछेष
भ्नतेसाधनेनुष्ठिनाः नाशेष। भ्नतेपरिधौ भवितुमर्हन्ति। यूपोस्य सर्वाश्वपरिव्याणादयो। न चेह यूपोस्ति अयम्प एव हिप
रिधौ पशुर्बध्यते। नेनार्थलोपादपि न परिधौ स्वलेवाल्मामिवयूपधर्मा ४ कर्त्तव्या इति निष्प्रसेन्नमः। यद्यपि परिधानार्थे
न परिधिरुस्यादिन ४ तथापि नियोजनेन विनियोगात्सुरोज्ञाशकपालस्येवतुषोपवापे शेषत्वमस्येव। यद्यपि नास्ति न
थापि नियोजनसाधनत्वात्साधननिवशिनो धर्मान्न लभेतैव। न हि नादर्थ्य प्रयुक्ता धर्माः ४। किंतु साधनत्वप्रयुक्ताः।
व्रीहिभिर्यजेतयूपे पशुं बध्नाती साटिभि हिंसाधनत्वेन विधीयमानाः व्रीह्यादयो धर्मैः प्रोक्षणपरिव्याणादिभिः सं
बध्यंते। तादर्थ्यंतु सत्यपशाद्दं न धर्मान्नयं न जति। न चोपयुज्यते तादर्थ्य धर्माणां कार्यं गछतां॥ तत्साधनमेव

श्रा. द्वारमपेक्षितमस्ति च परिधेरपि साधनत्वं। न च यूपाख्यमेकं किंचिदस्ति। यत्तु स्वसुपयोगिनः परिव्याणादयः परिधौ लु
२५ प्तार्थास्युः। छेदनादिविधयो हि सर्वे परस्परानपेक्षाः क्रमष्टगतं दृष्टमदृष्टं वा यथायथं कार्यं गमयन्ति। सर्वाणि च तानि निर्यो
णिनियोजनस्याङ्गं। न त्र परिधावसंभवनां छेदनादीनां लोपेपि संभवतः परिव्याणादयो न लोपनीयाः। खलेवाल्यामप्यं
जनपरिव्याणादयो भवं सवेतिवस्यते। न स्मात्सरिधौ यूपधर्माः कर्तव्याः परार्थत्वर्थोसामान्यात्संस्कारस्य तदर्थत्वा
त्॥ अभ्युदये स्यां दधिशृतनयोः किं प्राणीना धर्माः कर्तव्या नेति विनायां प्राणीता कार्येश्वपणेनयोः परिधेरिव नियोजने
विनियोगाभावादकरणमुसवनादीनां। मससपि विनियोगेर्थादपि नावत्साधनत्वमस्तीति साधननिवेशिनो धर्माः
कर्तव्याः। एकार्थत्वे च विभागः स्यात्। ज्योतिष्टोमे दृष्टहृद्धयं नरे दृष्टसाधनत्वेन विहिते। योनेर्धर्माः स्यंनरेप्रस्तूयमा राम.
ने संमीलये हृद्दृहनिप्रस्तूयमाने समुद्रं मनसाध्यायेदित्यादयः। किमुभयेपि धर्माः उभयोः कर्तव्या उत यथाश्रुतिमेव २५
स्येति संशये। उभयोरेकार्थत्वात्कार्यसाधनगोचराः धर्माः द्वयोर्द्वयोरपि स्युर्व्रीहिधर्मा यवेष्विव॥ ननु चात्मयाप्यं नरेण

स्तुतिः साध्यते श्रूरादिप्रकारेण अन्यथावघ्रहनाविज्ञादिप्रकारेणानेन साधनभावप्रकारभेदान्न साधननिवेशिनो धर्माः
न संकीर्य्यन्ते। यथा हि व्रीहिधर्माः स्रुवादिषु एककार्येष्वपि न भवन्ति। कारकभेदादेव मिहापि। नेन दृव्यं यद्देवहिरथ्यं नरं दृष्टं भ
वनीति शास्त्रविहितं साम्नो ह्यरानित्यं जनकत्वेन साधनत्वं तेनांशेन संमीलनादिधर्माः संबध्यन्ते। साधनविधिना हि संब
ध्यमाना धर्मा विधेयायस्यैव विधौ विवक्षितं साधनरूपं तेनैव संबध्यन्ते। श्रूरादिप्रकारभेदस्त्वविवक्षितो वस्तुस्वभावकृतो
न धर्मव्यवस्थायां हेतुर्भवितुमर्हति। किंचायमभिव्यज्यमानानामृचां भेदो यच्छूरादिरूपता। साम्नस्त्वक्षराभिव्यक्त्यात्मक
मेकमेकरूपमेव साधनत्वं। तस्मात्संकरणवात्र युक्तो व्रीहियवादिधर्माणामिव मीलनादीनामिति प्राप्तेऽभिधीयते। सा
म्नोऽर्थव्यवस्थया यस्मान्निर्द्दिष्टो मीलनादिषु। तस्मान्न संकरो युक्तो न त्वेवं प्रोक्षणादिषु। व्रीहिग्रहणं कारकविशेषोपलक्ष
णमिति कृत्वाय वेद्यपि प्रोक्षणादयः क्रियन्ते नतु दृदिहापि रथंतरग्रहरग्रहणं साधनमात्रोपलक्षणं स्यात्तत्र एकमेव
रथंतरं बृहद्वा सर्व्वधर्मविधिषु गृह्येते। यतस्तु क्वचिद्रथंतरं क्वचिद्बृहद्गृह्यते तेन न्यूनमिह रथंतरादिस्वरूपमपि विवक्षि

श्रा· नमित्तिगम्यते। तस्माद्व्यवस्था। किंच नानयोरेककार्यत्वं अन्यद्धि दृष्टं रथंतरेण साध्यते अन्यच्च बृहता। ननु दृष्टे स्तुवन
२५ तु निवाक्यासन्न दृष्टानुवादेन बृहद्रथंतरयोर्विधानादेककार्यत्वमनयोः। नैवं। यदि दृष्टेः स्तुवनरस्तुसत्तिः स्यात्तत
उत्पत्तिगतया बहुत्वसंख्यया बहूनि पृष्ठानि स्तुः। तत्र पक्षस्य मे सूत्रभाष्यकाराभ्यां ज्योतिष्टोमे पृष्ठबहुत्वं नास्तीत्युक्तं नहि
रुध्येत। तस्माद्रथंतरं पृष्ठं भवतीति रथंतरविशिष्टं पृष्ठं विधीयते। पृष्ठशब्दस्य स्तुतिवाचित्वं वाक्यशेषानुगुणवाक्यै।
श्चावगम्यते। तस्माद्भिन्नस्तोत्रसाधनत्वात् साम्नोस्तन्निबंधनानां धर्माणामाज्यौषधादिधर्मणामिव व्यवस्थासिद्धिः।
स्तोत्रयोश्चादृष्टार्थत्वात् प्रयाजादेरिव नैकार्थ्यं। नानाकार्ययोस्वस्तोत्रयोर्वचनवशाद्विकल्पः। तस्मान्न धर्मसंकरः॥ अ
प्राकृतेन तद्विकारादिरोधाद्व्यवतिष्ठेरन्॥ वैरूपस्तोमे श्रूयते एक एव रथंतरं पृष्ठं भवतीति तत्र संशयः किंक एव रथंतरं बृह
द्रथंतरयोः स्थानापन्नं कार्यं प्रयुक्तान् रथंतरधर्मान् बृहतः धर्मांश्च गृह्णात् विकल्पेन गृह्णाति उत समुच्चयेनेति संश राम·
यः। विकल्प एव तेषां स्यात् प्रकृतावसमुच्चयात्। मिथोऽनपेक्षैस्तैर्धर्मैः प्रकृतौ साधिता स्तुतिः॥ उच्यते दृष्टं यहि दैरसामर्थ्यं २५

द्यवस्था प्रक्रान्तो क्रमा॥ इदं त्वप्राकृतं सामद्वयोऽकार्ये विधीयते। नत्वद्वयोरपि कार्यं कुर्वन् धर्मान् पिद्वयोः समुच्चित्य गृह्णाती
ति भाष्यकारः। वार्तिककारस्तु विकल्पमेवमन्यते। तथा हि यद्यपि तावत्प्रकृतावेकैकवषट्कस्तुतिर्धर्माणां प्रयोजिका। तथापि
तेषां सामद्वारत्वात्तत्साम्नोश्चवैकल्पिकत्वात् धर्माणां चषट्य द्विर्देशेन व्यवस्थिततत्केचिद् धर्मीः रथंतररूपसाधनद्वारेण
स्तुत्यपूर्वं साधिनवंतऽके चिद्बृहद्वारेण। एवमेव विकृतावप्यतिदेशेन कदाचिद्रथंतरं स्वधर्मयुक्तं षट्स्य साधनं। कदा
चिद्बृहद्रे वं प्राप्ते तेक एव रथंतर [redacted] योऽकार्ये विहितमपि यथा प्राप्तयोः कार्ये विधानात्कदाचिद्रथंतर कार्ये कदाचि
द्बृहत्कार्ये विहितं भवति। न सर्वदा द्वयोऽकार्ये। न न श्चकदाचित्कस्य चिद्धर्मा न गृह्णाति। न सर्वदा सर्वान्। स्तुतिरपि प्र
कृतावन्यो न्यनिरपेक्षै धर्मैः साधिता। विकृतावपि न समुच्चयमपेक्षते। किमुत यदा द्वे स्तुती प्रक्रान्ते। वचनाद्विकल्पेना
नुष्ठिते विकृतावपि तथैव प्राप्ते। तयोश्च वचनाद्विकल्पेनानुष्ठीयमानयोऽसाधनत्वे न विधीयमानं क एव रथंतरम
न्यतरधर्मान्नेव गृह्णानी नियमक्रमेण। तस्माद्विकल्पऽ। उभयसाम्निचैवमेकार्यापनेऽयत्नेव बृहद्रथंतरयोऽप्रक्रान्तेनोवि

श्रा॰ कल्पे प्राप्ते समुच्चयो विधीयते। संस्रव उभे कुर्यादित्यादौ। तत्र किमुभयोः रथंतरधर्माः उभयोर्बृहद्धर्माः कर्तव्याः। उत र
२६ थंतरे रथंतरधर्माः बृहति बृहद्धर्माः एवेति संशये। द्वाभ्यामपि संहत्यैकैकस्य कार्यं साध्यत इति द्वयोरपि धर्मप्राप्तावुच्यते
॥ यद्येकैकस्य कार्ये द्वयं विधीयते तत्र स्यादेवं द्वारकेन विकल्पेन प्राप्तयोः पृष्ठयोरिह। स्वधर्मयुक्तयोरेव समुच्चयवि
धिस्त्वयं॥ एवं हि समुच्चयमात्रविधानाल्लाघवमप्राकृतकार्यता च साम्नोर्न कल्पिता भविष्यतीति तस्मात्स्वकृत निर्वर्हिहापि धर्माः
व्यवस्थिताः। पार्वणहोमयोस्तु प्रवृत्तिसमुदायार्थसंयोगात्तदभीज्याहि॥ स्रुवेण पार्वणौ होमौ जुहोतीति। तद्धि नक्षत्रापर्व
देवत्यौ होमौ किं विकृतिष्वतिदिश्येते नेति संशय्य तदर्थमिदं विचार्यते। किं पर्वशब्दः कालवचनः कालोऽस्य देवतात्वस्य
चासंस्कार्यत्वाद्द्वारादुपकारकौ होमौ। उताग्नेयादिसमुदायवचनः समुदायदेवत्यौ होमौ तत्संस्कारार्थाविति॥ तत्र का
ले शब्दस्य मुख्यत्वाल्लाभीज्येति मन्यते॥ दृष्टानेष्टीनकर्मत्वात्कर्मण्यपि च मुख्यता॥ दृष्टानेष्टीनकर्मणः पर्वशब्दः। स चेष्टी राम॰
यतेऽस्मिन्नित्यधिकरणव्युत्पत्त्या काले मुख्यः। भावव्युत्पत्त्या कर्मण्यपि। तत्र प्रकरणात्सामवाय्यिकत्वलाभाच्च कर्मवचनमेगी २६

कृतस्तत्संस्कारार्थतां होमयोरध्यवस्याम॥ तेषां च कर्मणां तन्त्रेणाभिहितानामग्नीषोमयोरिव व्याख्यास्यते देवतात्वं नैके
कृत॥ तेन समुदायस्य देवतात्वात् तस्य च विकृतिष्वभावात् तद्विकारत्वाच्च सोऽयमित्यत्र होमयोरप्रवृत्तिः॥ समुदायवि
कारो हि सोऽयमिति यो न समुदायविकाराः॥ उभयोरविशेषात्॥ किमेतौ होमावुभावुभयोः पौर्णमास्यमावास्ययोः कर्त
व्यौ उत विभज्य पौर्णमास्यां पौर्णमासीदेवत्यो ऽमावास्यायाममावास्यादेवत्य इति। तत्र प्रकरणाविशेषादुभावप्युभ
यत्रेत्याशङ्क्य संस्कारार्थत्वात् संस्कारस्य सूक्तवाक्न्यायेन निष्कर्षः॥ तेनैव च न्यायेन गन्तव्यं नेदमधिकरणान्तरं। पूर्वस्मि
न्नेव तु प्रयोजनसूत्रद्वयमिदमुभयोरविशेषात् यदभ्यावानदृश्यावितिः ऊहसिद्ध्यर्थमवान्तरकार्यनिरूपणं प्रस्तु
तमिति तत्प्रसंगात् सावर्णयोरवान्तरकार्यं निरूपितं॥ प्रयाजे पौर्णिवचन॥ समिधो यजतीत्यनूनयाजनीसम्प्रापि किंक
र्मसंबन्धिनः समिदादीन् देवतात्वे नोद्दिश्य तत्संस्कारार्थं यागविधानमुतारादुपकारकयागविधानमिति संशये पूर्ववत्
त्सामवायिकत्वलिप्सया संस्कारविधिः॥ द्वितीया च देवताभिधाने समर्थैव विलुप्य जनीसादिषु दर्शनादिति प्राप्ते ब्रूमः॥

शा. उद्देशपूर्वकस्यागोयजिनात्यभिधीयते। यागे च नास्ति कर्मत्वं देवतायाः कथंचन ॥ उद्देशांशे गतं तु कर्मत्वं यागेष्वपि चर्यवि
२७ स्कंयजनीसादिनिर्देशः न चेह विधौ उपचारो युक्तः। यागास्ति हि केवलो विधीयते। तेषां च ॥सादिभि॰ कार्यविशेषानवगमा
त्प्रकरणे नारादुपकारकत्वं। समिदादिशब्दास्तु मन्त्रवर्णप्राप्तदेवतानिमित्तानि हि सनामधेयानि। देवता एव वानुवदन्ति। न
चानुवादे उपचारो दोषस्तस्मादारादुपकारकाः॰ प्रयाजाः॥ ॥इति शास्त्रदीपिकायां नवमस्य द्वितीयः पादः॥ ॥प्रकृतौ
यथोत्पन्नवचनमर्थानां तथोत्तरस्यां ततोऽनत्वप्रकृतितादर्थ्ये चाकार्यत्वात्॥ मन्त्राणामिदानीमूहश्चिन्त्यते। अग्नये जुष्टं
निर्वपामीति व्रीहिणां मेधस्तु मनसमानद्रसेतो मन्त्रो किं सौर्यादिषु नीवारादिषु चोहितव्यानु नेति संशये। प्रकृतौ
यादृशो मन्त्रस्तादृक् एव न हि नादृशः। प्राप्यते विकृतौ तत्स्मान्नोहस्तत्राविकल्प्यते। ननु कार्यद्वारेण मन्त्रा॰ प्राप्यन्ते कार्यं चा
पूर्वीयदेवताप्रकाशनं नाग्निस्वरूपप्रकाशनमिति सुक्तं फलदेवतयोश्च सत्त्वात्तस्यादिहापि सूर्य एव प्रकाशयितव्यः॰ न राम
चाग्निपदं तत्प्रकाशने समर्थमिति सूर्यपदं प्रक्षेप्तव्यं॥ उच्यते सत्यं सूर्य एव प्रकाश्यः॰ स तु चोदकप्राप्तेनाग्निपदेनैव २७

गुणत्वस्य प्रकाश्यत्वेन तद्यथैन्द्र्या गार्हपत्यमुपतिष्ठत इति वचनादिन्द्रपदेनैव गुणत्वस्य गार्हपत्यस उपस्थीयते तथेहापि प्रा

कृतस्यैवाग्निपदयुक्तस्य मंत्रस्य सूर्यप्रकाशनाय चोदकेन विनियुक्तत्वात्तेनैव सूर्यं प्रकाशयिष्यामः। अन्यथार्थवशेन

मंत्राणामन्यथाभावकरणे गार्हपत्यवदैन्द्र्यापि मंत्रः ऊहितव्यः स्यात्। तस्मादेतावानेव मंत्राणामन्यथाभावो यत्स्व

कृतावग्निः प्रकाशितो विकृतौ सूर्य इति। ननु पठितपदोद्धारः पदान्तरप्रक्षेपश्च युक्त इति प्राप्तेऽभिधीयते॥ प्रकृतौ यादृ

शं रूपं मंत्राणां हि विवक्षितं। तादृगेवातिदेष्टव्यं विकृतौ नाविवक्षितं स्वकृतावग्निपदं न स्वरूपविवक्षया पठितं अग्निपद

युक्तो मंत्रः कथं नाम स्यादिति। यदि ह्येवं भवेत् ततः स्वेनैव यथाकथंचित्प्रकाश्येत सूर्यः। देवतावाचिपदविवक्षया त्विदं प

ठितं। देवतावाचिपदयुक्तो मंत्रः कथं नाम स्यादिति एवमभिसंधायाग्निपदं पठितं। तस्यैव प्रकृतौ देवतावाचित्वादवश्यं

हि देवतापदयुक्तमंत्रमपि जिगीषमाणेनाग्निपदमेवाध्येतव्यं। अतस्तद्रूपविवक्षयाग्निपदं पठितं। तथा सति दृष्टार्थं भव

ति। स्वरूपविवक्षायां त्वदृष्टार्थं नैव स्यात्। एवं च विकृतावपि देवतावाचिपदयुक्त एव मंत्रः प्रयोक्तव्यः॥ न चाग्निपदस्यान्ता

म्रा. द्रूप्यमस्तीति भनः सूर्यपदप्रक्षेपः। एवं ब्रीहिपदमपिह विठप्रकृति इत्वा विपदाति प्रायं। न स्वरूपाभिप्रायमिति नीवारादिषू
२९ हसिद्धि॥४ बहुषु तु नद्वाचिषु सत्सु ब्रीह्यादिपदमेव पठितं। ततो नियमादृष्टमात्रं कल्प्यते अवघातादिवत्॥ स्वरूपं त्व
पूर्वीयसाधनविशेषवाचिपदविवक्षयाप्रयुक्तं दृष्टार्थत्वात् तस्मादाहः ऐंद्री तु स्वरूपेणैव गार्हपत्ये विनियुज्यत इति विषय
म्यं॥ जातिनिमित्तिकं यथास्थानं॥ क्वचिच्छ्रूयते येषां उरीकाणि बर्हींषि भवंतीति। प्रकृतावस्ति बर्हिषि मंत्रः४ दर्भैः स्तृणी
त हरितैरिति। तत्र दर्भशब्दस्थाने पुंडरीकपदमूहितव्यं पूर्वेणैव न्यायेन। हरितपदस्थानेपि किं रक्तपदमूहितव्यं
नेति संशयः दर्भशब्देनैव सिद्धे प्रकाशने हरिताभिधानमदृष्टार्थं प्रकृतौ। तस्माद्विकृतावपि हरितपदमेवादृष्टार्थ
मभिधानमिति सन्नूह॥ स्यादेवं यद्यदृष्टार्थं स्यात्। अनेनापि तु गुणद्वारेणास्तरणद्रव्यमेव प्रकाश्यते। अर्थाभिधा
नपरत्वान्मंत्राणां। अतः पुंडरीकाणामपि स्वगुणद्वारेण प्रकाशयितुं रक्तपदं प्रयोक्तव्यं॥ लौकिके दोषसंयोगादप्र रा.म.
वृत्ते हि बाधनेनिमित्तेन प्रकृतौ स्यादभागित्वात्॥ प्रासंगिकमिदमधिकरणं। यद्येकं रूपमुपस्पृशेत् एष नैवायोदिति २९

क्रयाघ्रदिहो एतौ नेवायष्टेतियदि वहूरैन् एने नेवायवरू सादिवाक्यंलिंगदर्शनत्वेन पूर्वोधिकरणे प्रस्तुतं। तत्रेदं विचा
र्यते किं वैदिकपूपाज्ययणादिविषये स्पर्शे प्रायश्चित्तं उत लौकिके उत उभयत्रेति। विशेषाश्रवणादनियमः। प्रकरणात्फ
लकल्पनापरिहाराच्च वैदिक एवेति प्राप्ते उच्यते॥ दोषनिर्हरणायेदं प्रायश्चित्तं विधीयते। दोषश्च प्रतिषिद्धस्य प्रतिषेध
श्च लौकिके। पूपो वैयत्तस्य दुरिष्टमामुंचतेति तस्मात् पूपो नाय स्पृश्य इति पिप्पलश्चादिरमु च्यते यथैकमुपस्पृशेदिति। प्रतिषे
धश्च रागप्राप्ते लौकिके। वैदिकस्य विहितत्वेन प्रतिषेधानर्हत्वात्। प्रतिषेधानुष्ठाने प्रसक्तयोरप्यतः प्रतीकारापेक्षायां
प्रायश्चित्तविधिरपेक्षितार्थो भवति। तस्माल्लौकिके प्रायश्चित्तं अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वादविशेषाच्चेतेना
अदितिः स्य अग्नीषोमीयपशावेकवचनांतः पाशं प्रमुमोक्तमिति। तथा बहुवचनांतो दितिः पाशान् प्रमुमोक्तानिति। तयो
रग्नीषोमीये निवेश उपरितनेऽधिकरणे वक्ष्यति। तयोर्द्विपशुकेषु मैत्रं श्वेतमालभेत वारुणं कृष्णमित्यादिषु चोदकेन
प्राप्तयोः भवति संदेहः। किमेकवचनांतस्य प्रवृत्तिः बहुवचनांतस्य नूहेन प्रवृत्तिः। उत बहुवचनांतस्य प्रवृत्तिरे

रा॰ २९ कवचनांतस्योहन प्रवृत्तिः। रथवो भावप्रियमापथ्यमूहेनानूहेनं च प्रवर्तेते। किं वोभयोरपि द्विवचनेनोहितयोः प्रवृत्तिरि-
ति। नचैकवचनस्यासंभवेनाभिधापितत्वेन विकल्पेनापि द्विसंख्यावत्कुविकारः स्यात्। बहुवचनस्य त्वेकस्मिन्नसंभवेना-
29 भिधापितत्वेन भिरीश्यमात्रार्थत्वाद्विकल्पेनापि तथैव संभवाद्नूहः। नचाविकारसंभवे विकारो युक्तः॥ तस्मादेकवचनांत-
स्याप्रवृत्तिः॥ इतरस्य त्वविकारेण प्रयोग इति प्रथमः॥ पक्षः। सकलाभिधानसंभवे विकल्पाभिधानमन्याय्यं। तस्मा-
त्संख्याविशिष्टपाशप्रकाशनार्थमेकवचनांतस्योहितस्य प्रयोगः। बहुवचनांतस्य त्वविवक्षितसंख्याकपाशमात्र-
प्रकाशनेनासमग्राभिधानत्वादप्रवृत्तिरिति द्वितीयः॥ द्वयोरपि चोहकेनप्राप्तत्वात् यथायथमूहेनानूहेन च विकल्पे-
न प्रयोग इति तृतीयः॥ गृह्णीमहे न तु द्वयोः प्रवृत्तिरिति। ननु बहुवचनस्यानूहः इदमपि द्वयोरसाधुत्वादूहितव्यं। प्रकृ-
तावेकस्मिन्पाशे छंदसि बहुवचनस्य प्रयुक्तत्वात् तथैवांगीकृतं। न त्वेवं द्वयोः प्रयोगः छंदसि दृष्टः॥ तत्रास्मद्दायने राम॰
प्रयोगे सत्यसाधुप्रयोगासंभवाद्द्विवचनं प्रहेतव्यं। तस्मादुभयोरूह इति सिद्धांतः॥ विप्रतिपत्तिविकल्पः स्यात्समत्वा- २९

हुणेत्वन्माप्यकत्यनैकदेशत्वात्॥ पशावग्नीषोमीयेपाशमंत्रावेकवचनबहुवचनांतौ। तत्रबहुवचनांतेसंदे
हः किंप्रकृतावग्नीषोमीयेनिविशते उतबहुपाशकेषुपशुगणेषुउत्कृष्यतइति॥ एकस्मिन्बहुवचनस्यास
मवेतार्थत्वादुत्कर्षेप्राप्तेभिधीयते। प्रकृत्यर्थस्यपाशस्यविभक्त्यर्थस्यकर्मणः उभयोः प्रकृतौभावान्नोत्कर्षोस्यावकल्प
ते। पाशप्रातिपदिकार्थान्वितंविभक्त्यभिहितंकर्मकारकंप्रकृतावपिपाशकर्मकोन्मोचनाभिधानेनसंभवन्नोत्कर्षंस
हते। संख्यामात्रंतुसंभवदपिगुणत्वातियद्विकंप्रधानभूतंकारकंवाअलमुत्कष्टुं। अविवक्षिताचेहसंख्या। पाशक
र्माभिधानमात्रेणव्यवहारसिद्धेः। अतोनिर्देशमात्रार्थंबहुवचनं॥ कर्ममात्रंतत्रविवक्षितं अतोपिनसंख्यावशेन
मंत्रोत्कर्षः। बहुवचनस्यत्वेकस्मिन्प्रयोगेवयवबहुत्वाभिधानंप्रायेणछांदसः॥ अपूर्वेतुविकारोप्रदेशात्प्रती
यते॥ दर्शपूर्णमासयोः पत्नीसंनह्यतिमंत्रः किमेकद्विबहुपत्नीकेषुप्रयोगेषुसर्वेषुविकारेणप्रयोज्यः उतद्वि
बहुपत्नीकप्रयोगयोर्द्विवचनबहुवचनाभ्यामूहितव्यइतिसंशयः। तत्रैकपत्नीकेसमवेताभिधायित्वसंभवान्नैकव

रा. चनमप्राप्य निगदं। तस्माद्द्विबहुत्वयोरूहः॥ नैतदेवं यद्येकपत्नीप्रयोगाभिप्रायमाम्नानं स्यात्तत एकवचनस्य स
३० मवेतसंख्याभिधानरूपस्य संप्रतिपन्नरूपत्वात्समवेतसंख्याभिधानमिह विवक्षितमेकवचनरूपं त्वविवक्षि
तमिति द्विकत्वाद्धि पत्नीके बहुपत्नीके च प्रयोगे समवेतसंख्याभिधानार्थमूहो न॥ सर्वप्रयोगाणां तु समानविधानत्वा
30
त्सर्वाभिप्रायेणेदमाम्नानं। द्वयोर्बह्वीषु चैकवचनस्य संप्रतिपन्नभावात्समवेतसंख्याभिधानरूपेण प्रयुक्त
मिति शक्यमध्यवसातुं निर्देशमात्रार्थं त्वेकवचनमदृष्टार्थं चैकत्वमभिधातुं प्रयुक्तमित्यापद्येत। न तस्माद्द्विबहुप
त्नीकप्रयोगे एकवचनमेव प्रयोक्तव्यमित्यविकारः॥ न चैकवचनानुरोधेनैकपत्नीकप्रयोगे मंत्रो नाम्नात एवेति वक्तव्यं
।पाशवत्प्राप्ति यद्विकल्पेन सर्वत्र प्रसज्यते।॥ संख्या चाविवक्षितत्वेनानेकपत्नीकास्वप्रयोगान्मंत्रमावर्तयितुमसम
र्था। तस्मात्सर्वत्राविकारेण प्रयोगः॥ विकृतौ चापि न द्विवचनान्न॥ विकृतौ पत्नीशब्दः किं द्विपत्नीकबहुपत्नीकप्रयोगयो राम.
रूहितव्यो नेति संशये प्रकृतौ द्वयोर्बह्वीषु च पत्नीषु एकवचनाम्नानसामर्थ्यान्न प्रयुक्तं। विकृतौ त्वाम्नानाभावात् द्विब ३०

हुत्वयोरेकवचनमसाधुत्वान्नप्रयोक्तव्यं। तस्मात् हृहः नैवं निर्देशमात्रार्थमदृष्टार्थमैकवचनं। न समवेन संख्याभि
धानार्थमित्युक्तं। अतो विकृतावपि तथैवकर्तव्यमिति सन्नूहः॥ न चासाधुत्वं द्विबहुत्वयोरेकवचनस्य। छांदसत्वात्॥
पाशेनु द्वयोर्बहुवचनप्रयोगस्य छांदसत्वाभावादसाधुत्वं स्यादिति विशेषः॥ अध्रिगुः सवनीयेषु न ह्यसमानविधा
नात्वेन॥ त नीये ध्याये संस्थाप शव॥ समानविधानात् इति पूर्वपक्षे समानविधानत्वं यदुक्तं तस्यैवं प्रयोजनं पूर्वोधि
करणसिद्धमनेन सूत्रेण कथ्यते। यदा समानविधानाः स्युः दोषः पोज स्यादि बुद्धिबहुपशुकेपि सवनीयगणप्रव
र्तमानः प्राप्नुयात् सध्रिगु प्रैषगत एकवचनान्तः शब्दः पत्नीशब्दवदेवनोहिनमः॥ विकारपक्षेत्तहि नव्यः॥ ननु स
मानविधानत्वे यथाप्राप्तमात्इति पुल्लिंगनिर्देशात्मारस्वसामपप्रवृत्तिस्तथैकवचननिर्देशात् द्विबहुषु प्रवृत्तिः स्यात्
नैवं पुल्लिंगस्य मेष्यामसंनासंभवात् घृता निहतिः॥ एकवचनं तु प्रति व्यक्तिगतैकत्वाभिप्रायेण गणेपि संभवान्नासं
तानुपपन्नो। पाशानिति बहुवचनमिवावयवाभिप्रायेणावायन्नमिति नेनत्यं अपि च जाम्या स्वायामेकस्मिन्बहु

श्रा०
३१

वचनं बहुष्वेकवचनं स्मर्यते। अतोऽपि न वचनयोरनुपपत्तिः॥ लिंगं त्वस्य लिंगे संज्ञानुपपन्नमिति वैषम्यं। प्रतिनि
धौ चाविकारात्॥ श्रुतस्य द्रव्यस्यापचारे नीवारादिषु प्रतिनिहितेषु व्रीहीणां मेधसुमनस्यमान इति व्रीहिशब्दः किं
मूहितव्यो नेति संशये नीवारादिषु व्रीहिपदस्यासामर्थ्यादूहप्राप्तौ उच्यते यदि नीवाराः व्रीहिवत्साधनं भवेयुस्तत
स्तत्प्रकाशनार्थं नीवारपदं प्रक्षिप्येत। न त्वेवं। किं तर्हि नीवारद्रव्यगतापेक्षा व्रीहिसंख्या॥ तेन तत्साधनमित्युक्तं। तेन च व्रीहिगतावयव
नीवारगता अपि व्रीहिशब्देनैव शक्यंते प्रकाशयितुमित्यविकारेण प्रयोक्तव्य।॥ संसर्गिषु चार्थस्यास्थितपरिमाण
त्वात्॥ ज्योतिष्टोमे अग्नीषोमीये पशावभिगुप्रैषः॥ तत्र संसर्गिणोऽर्थस्य स्वरूपस्य॥ सूर्यं चक्षुर्गमयतादित्यादयस्ते हि
पश्वादिषु पशुगणेषु किं द्विवचनबहुवचनाभ्यामूहितव्या नेति संशये संसर्गिणां तेजः॥ प्रभृतीनां स्वतः॥ संख्याव्यव
हाराभावादेषोपाधिकोऽभेदव्यवहारः न हि चक्षुः॥ शब्दस्य तेजोवचनत्वात्सति सत्वे॥ संख्याभावात्केवलाधिष्ठानापेक्षत्वे च तयो राम०
र्द्वित्वेन द्विवचनप्रसंगात् उपश्लेषाधिकमेकवचनं। अस्पष्टत्वेन च परेण रूपानन्त्वात् उपाधिकमेव विज्ञायते। अतः ३१

31

पशुभेदे पशुसंख्यावशेनोह इति प्राप्तेभिधीयते अधिष्ठानाभिधानं स्यात् सर्वविपपतान्॥ नत्रैनैकधास्य त्वचमा
म्नानादिति श्रुतं। नत्वैकधाशब्दः पशुगतेषु किंतु विकारेण प्रयोक्तव्य उताभ्यासेनापि विकर्तव्य इति संशये तदर्थमि
दं विचार्यते किं प्रकृतौ येन प्रकारेणाभिधानं कृतं तेनैव प्रकारेण विकृतावपि कर्तव्यमुतान्यथापि संभवतीति। न
नत्र यद्यपि प्रकृतावेवत्वात् त्वचः साहि साभिधानं न संभवतीति सकृत्प्रयत्नसाध्यत्वं एकधाशब्देनोक्तं। नावयवशः
आच्छ्यतान्। किंतु एकधा एकेन प्रयत्नेनेति तथापि विकृतावार्षे चोदकानुग्रहाय बहूनां त्वचां देशतः कालतो
वा साहित्यमेकधा गाः पालयतीतिवद् भिदुरविकारेणैव त्वगाच्छेदनं प्रकारान्तरैष्यतीति प्राप्ते ब्रूमः। प्रकृतौ यस्य
शब्दस्य यादृशोऽर्थो निरूपितः। नादृगेवातिदेशोपि सहि कार्यपरायणः। कार्यप्रधानो ह्यतिदेशो न शब्दस्वरूपप
रः। तेन प्राकृतमेकप्रयत्नसाध्यत्वं प्रसेकं च वामभिधानुमेकधैकधेसेन मप्यस्ति न व्यं॥ मेधपतित्वं स्वामिदे
वयोः समवायात् सर्वत्र च प्रयुक्तत्वात् तस्यान्याय्यनिगदत्वात् सर्वत्रैवाविकारः स्यात्॥ नत्रैव पशुनं उपनयनमेध्या

श्रा. हृदः आश्रासानामेधपतिभ्यां मेधमिति। केधमिति। केषांचित्तु मेधपतये मेधमिति। तत्र चतुर्द्धा संदेहः। किमुभयो
३२ र्विकल्पित षड्विकारः। उत द्विवचनस्य देवतापरऊहः एकवचनस्य तु यजमानपरः। अथवोभयोर्यजमानपरएव। अ
थवोभयोरपि देवतापरऊहः इति। तत्र मेधपतिशब्देन मेधस्य पशोः स्वामी यजमानो देवता च भण्यते। वाग्नीषोमौ उभये
32 प्यभिधीयन्ते। तेन द्विवचनं एकवचनं च उभयमप्यन्याय्यनिगदं। तस्मादनूहः इति प्रथमः पक्षः। स्वभवस्वार्थ
वत्तेनान्याय्यनिगदत्वायुक्ता। तस्माद्द्विवचनान्तो देवतावचनस्तेनासौ देवताविवक्षायां ऊहितव्यः।। एकवचनान्तस्तु स्वा
मिवचनः स्वामिविवक्षायां विनिहितीयः। एकोयं मन्त्रः श्रारतामे देनकिंचिच्छिन्नः समाम्नातः। तत्र यजमानपरत्वे मेध
पतये यो मेधस्तमाश्रासानाः इति संबंधः। देवतापरत्वे मेधपतिभ्यामपि यजमानस्य देवतायाः वा नियमेनाभिधा
नं। तत्र देवतापरत्वे सत्यग्नीषोमपोर्द्वित्वादेकवचनमनुपपन्नं स्यात्। यजमानपरत्वे तु द्विवचनं पत्न्यभिधानपरत्वे राम.
नावकल्पते। तस्मात्स्वामिपरावुभावपि स्वामिवश्यादूहितव्याविति तृतीयः।। सिद्धान्तस्तु मेधमाश्रासाना इत्युक्ते किंस ३२

र्थमाशासानाऽसपेक्षा भवति। तत्र मेधपतिभ्यैभ्यामाशासानाऽसपेक्षितार्थप्रकरणापसंबध्यते। न च यजमाना
यासानाशास्यते। तस्यैव हि सतः देवताभ्यामाशास्यते। तस्माद्देवतावचनं। एकवचनं तर्हि कथं। अग्नीषोमयोरुभ
योर्थ्यमेकं देवतात्वं तेन देवतात्मनानयोरेकत्वात् अभिप्रायमग्नीषोमयोर्देवतेविव। द्विवचनं त्वधिष्ठानापेक्षं। तेन
द्विवचनमधिष्ठानसंख्यावशादेकवचनं देवतासंख्यावशात् द्विकृतिष्वपि नयं॥ नियमोवा बहुदेवते विकारः स्यात्
वैश्वदेवादिषु बहुदेवतेषु पशुषु द्विवन्निगदस्य मेधपतिशब्दस्याहोऽस्मदिग्धः। एकवन्निगदेऽपि नद्वदेवोऽस्यः। ए
कवचनांतनयानुनिवर्त्तने उत्ताविकारेण प्रयोक्तव्य इति विनायामेकवचनस्य बहुषु सामर्थ्यादूहो देवतारूपेकत्वा
त्तु प्रकृतिवदनूह इति पूर्वाधिकरणप्रयोजनमात्रमिदमधिकरणं। ननु किंचिदस्ति पाघमस्ति। यद्यूहो नराधिकर
णायोहो न त्वे न पूर्वाधिकरणेनास्मिदमेवानुकीर्तितं। अर्थान्तरे विकारः स्यादेवतायापत्वादेकाभिसमवायात् स्यात्
॥ आग्नेयः कृष्णग्रीवः। सारस्वतीमेषी बभ्रुः सौम्यः इत्यादिषु पशुगणेषु किमेकवन्निगदस्याविकारः उत नविकारेण प्र

शा· योग इति संज्ञायेगणाभिप्रायेण पूर्ववदनूहं मन्वानस्योत्तरं देवतात्मन एकत्वादविकारः पुरोहितः। तद्रूपस्य तु
३३ भिन्नत्वेऽप्यनामोहं निवारयेत्॥ इति शास्त्रदीपिकायां नवमाध्यायस्य तृतीयः पादः॥ ॥षड्विंशतिरभ्यासेन पशुग
33 णेन सङ्कीर्तितानां गणस्य प्रविभक्तत्वादविकारे हि तासामकार्त्स्न्यान्न संबंधो विकारात्तु सः स्यादसंयोगात्त्वसर्वाभिः॥
॥तत्रैवं षड्विंशतिरस्य वंक्रय इति श्रुतं। तद्धि पशुत्वादिषु पशुगुणेषु वा एकमात्रे पंचधा संदिह्यते। किं षड्विंशतिरस्य
सुभयपदाभ्यासः। उत्ताविकारेण प्रयोगः। उत षड्विंशतिपदगतमेकवचनं द्विवचनबहुवचनाभ्यामहितत्वं। अथ
वा अस्येत्यस्य समभ्यस्तितत्वमाहोस्वित्सर्वपशुगतावंक्रीः समस्तानां सामियता वंक्रमेति॥ तत्र षड्विंशतिसंख्याया अ
स्यशब्दाभिधेयस्य च पशोर्यः संबंधः तत्प्रधानमिदं वाक्यं। ततः प्रतिपशु तत्संबंधप्रकाशयितुं षड्विंशतिपदमस्य पदं
चाभ्यसनीयं। अयमेवात्र प्रधानतः पूर्वपक्षः। इतरे तु संभवमात्रेणोपन्यस्य दूष्यंते। तत्र द्वितीयः पक्षः अकरणभूतो राम·
यमदृष्टार्थोऽमंत्रस्तस्मादविकारः। तृतीयस्तु यद्यप्यकरणस्तथापि शमितॄणाममंत्रनावदानोद्धरणाय पार्श्वयोः साकं ३३

त्वंसम्बारयन्नहृष्टार्थएव। नत्रषड्विंशतिसंख्याप्राधान्येनप्रकाश्या। तेनहृयोः पश्वोः षड्विंशतिसंख्येप्रकाशयितुं प
ड्विंशतीअनयोर्वंक्रयहृति। ननुषड्विंशतिशब्देसंख्याप्रधानेसंख्येयेषुवंक्रिषुषष्ठीस्यात्संसंयथासिद्धांतेवंक्रीणांप्रा
धान्येसंख्याशब्दस्यलक्षणयासामानाधिकरण्यंतथासंख्याप्राधान्येवंक्रिशब्दोलक्षणयासंख्यासामानाधिकरण्यंप्र
तिपत्स्यते।। चतुर्थस्तुपशुप्रधानमिदं।सहिचोदितः।संख्यात्वचोदिता।तस्मात्तपक्षेनाभिधेयः पशुरेवात्रप्रधानं
।नहिशेषणंसंख्यावंक्रयश्च।षड्विंशतिवंक्रिकोयंपशुरिति।ततश्चैकैकंपशुंभेदेनप्रकाशयितुमस्यपदस्यमभ्यस्ति
तव्यं।। सिद्धांतस्तु।। वंक्रीयत्ताप्रकाश्येहपार्श्वसाकल्यसिद्धये।ताइतिप्रनिर्देशादपितासांप्रधानता।वंक्रयोत्रप्रधा
नं।तात्एवषड्विंशतितद्देनेयत्तयाप्रकाश्यंते।अनुनयोः पार्श्वयोरवघतीतिवचनात्।यद्यपिपशुः चोदितः तथा
प्यसौहृहृयादिद्वारेणैवसाधनं।नसाक्षादितिवक्ष्यामः।तस्माद्वंक्रयः प्रधानं।तथाचताअनुष्ठोच्यावयतादितिता
सामेवोतरत्रप्रतिनिर्देशउद्धरणंचोच्यते।पशुप्राधान्येहितमितिस्यात्संख्याप्राधान्येतामितितस्माद्वंक्रीयत्तायस्ता

शा॰ त्तमस्याभिधानं। ननु यद्यपि वंकीयता परमिदं तथापि प्रतिपदं भेदेन वंकीणा मुद्धरणाद्भेदेन पशोर्वंक्रय द्वयन
३४ मावक्तव्या इति षड्विंशतिपदाभ्यास एव न्याय्यस्तथा चाश्वलायनादयो यज्ञसूत्रकारा मन्यन्ते। नेति भगवान् जैमिनिः।
सहि मन्यते यथैव हि प्रकृतौ द्वयोः पार्श्वयोस्तयोरष्टासु त्रयोदशसु वंक्रिषु पृथक् पृथगुद्धार्यमाणास्वपि समस्ताना
34 मेवैकतो षड्विंशतिरस्य वंक्रय इति तथा विकृतिष्वप्युद्धारभेदमनादृत्य प्रयोगस्समवेतस्समस्तवंक्रीयता मंत्रे
ण प्रकाशयितव्या। तस्माद्विपंचाशदेतयोर्वंक्रयोऽष्टसप्ततिरेषां वंकपरस्त्वेवं समस्ताभिधानमेव साध्यं। अश्व
स्य चतुस्त्रिंशत्तस्य वचनादेकैषिकं॥ अश्वमेधेऽश्वस्यनेऽश्वस्तूपरो गोमृगस्ते प्राजापत्या इति। तस्याश्वस्य चतुस्त्रिं
शद्वंक्रयस्तत्र वैशेषिको मंत्रः पठितः चतुस्त्रिंशद्वाजिनो देवबन्धोर्वंक्रीरश्वस्य स्वधितिः समेतीति। तत्रेदं वचन
मामनन्ति। चतुस्त्रिंशदिति द्रूपात्षड्विंशतिरित्येव ब्रूयादिति। तत्र भाष्यकारोऽश्वस्य चतुस्त्रिंशदित्येवमादि सूत्रपंच शम॰
मेकाधिकरणत्वेन व्याख्यानवान्। वार्त्तिककारस्त्विदं सूत्रं पृथक्समाप्ति सूत्रत्वेनाधिकरणान्तरत्वेन व्याख्या ३५

नव्यमित्युक्तवान्। नञाधिकरणांतरमेवं द्रष्टव्यं। वैशेषिकाक्ष च तुः प्रतिषेधोयं न चतुस्त्रिंशदिति ब्रूयादित्युपरितने
धिकरणे वक्ष्यति दूरं त्वत्र चिंत्यते। किं निषिद्धमपि वैशेषिकं पक्षे स्यात् उत सर्वदा प्राकृतमेवेति। तत्र पाठप्राप्तं वैशेषि
कं गिरापदवत् प्रसक्तं न च नञ्बलान्निरस्य बाधितुं प्राकृतमेवाधिगुवच्च न गिरापदवत्सर्वदा वक्तव्यमिति प्राप्ते ब्रूम
ः। इरापदं हि प्रत्यक्षेणैव वचनेन गिरापदस्थाने विहितं। पुनःकंयस्या पाठप्राप्तं वैशेषिकं गिरापदं बाधते। तस्मिन्नाधिने त्वनु
वादत एव गिरापदप्रतिषेधः। न त्वेवमिह। षड्विंशतिरित्येवेव ब्रूयादित्येन हेवकारोपहतेन विधिशक्तिलाल्लाक्षत स्यवि
धेस्समर्थः अतोत्र न चतुस्त्रिंशदित्येव प्रतिषेधं विधत्ते। तस्मिंश्च प्रतिषिद्धे षड्विंशतिरित्येव ब्रूयादिति चोदकप्राप्ता
नुवादत्वा। न त्वेषं गिरापदप्रतिषेधादिरापदं प्राप्नोतीति। येनान्ययेन। तस्यापि विधौ वाक्यभेदः। तेन न त्वत्रेरापदविधि
रेव वाक्यार्थः। इह तु प्रतिषेध एव विधेयः। स च प्राप्तिपूर्वकः। प्राप्तिश्च न शास्त्रमंतरेण संभवतीत्यतो वश्यं वैशेषिक
वचनस्य प्रमापकं प्रकरणपाठानुमितं वा कल्प्यं लाघवाय काममंगीकर्तव्यं। अंगीकृते चास्मिन्नुभयोर्विधिप्रति

शा. षेधयोऽशास्त्रत्वाविशेषाद्विकल्पः। तस्माद्वैशेषिकवचनमपि कर्तव्यं॥ नञ्प्रतिषिध्यमानकृतिर्नियुज्यते साचतु
३५ स्त्रिंशद्धाव्यत्वात्॥ नचैव संशयः किमश्वस्य पठितमेव चतुस्त्रिंशद्धा जिनत्तीति वैशेषिकं कर्तव्यं उत्तमाङ्गनमपि।
35 यद्यपि माङ्गतं तद्यपि किंतु परगोमृगयोरश्वस्य च समस्य वचनं षडशीतिरेषां वंक्रय इति। उत तत्परगोमृगयोस्मा
मास्तिकं वचनं कृत्वाऽश्वस्य षड्विंशतिरस्य वंक्रय इति एवमयथार्थमधिगुणवचनं कर्तव्यमिति। नञ्न चतुस्त्रिंशदिति
ब्रूयात् षड्विंशतिरित्येव ब्रूयादित्यनेन पठितायामेव त्रिंशिरापरत्व चतुस्त्रिंशत्सदं प्रतिषिध्य षड्विंशतिपदमिराप
द्वचनं निक्षिप्यते। न त्वयं समस्तायाभवऽप्रतिषेधः। तस्मात्तेवष षड्विंशतिपर युक्ता वक्तव्ये ति चोदकमातताधि
गुवचनस्य तत्र उच्यते। एवकारोपबद्धत्वान्न षड्विंशतिचोदनाचतुस्त्रिंशन्निषेधे वचनानुवादस्य संभवी। अ चाएवनि
षेन स्तयासति वचोदकाम्॥ मा संषड्विंशतिरिति ब्रूयादित्यनुकीर्त्यते। न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रू राम
यादित्येकमिदं वाक्यं। मिदं वाक्यं। नेनैकोत्र विधिरिति नोनुवादः। तत्र यद्वीरापरत्न षड्विंशतिर्विधीयते न तमुस्त्रिंश ३५

स्या।

म्प्रतिषेधो गिरापरम्प्रतिषेधवदन्यथैव ना। न त्वेवं षड्विंशतिपदमिरापरवदुक्त्यं विधातुं। एवकारोपबन्धादेकाकारार्थविशे
षणं हि ब्रूयादिति। न स्वयं विधिक्षममिवकाराथश्च निवृत्तिः। तस्मात्षड्विंशतिपदमतिरिक्तस्य निवृत्तिरिह विधीय
ते। ऐरं कृत्वोद्गेयमिति शक्नोति विधातुमिति विशेषः॥ नेन चतुस्त्रिंशत्प्रतिषेधोऽत्र विधीयते। न यदि परमात्रम्प्र
तिषिध्येतेन षड्विंशतिपदमनुवदितुं शक्यते। प्राप्त्यभावात्। न हि पठितानामविचतुस्त्रिंशत्सरे प्रतिषिद्धे षड्विंश
तिपदस्य प्राप्तौ प्रमाणमस्ति। तस्मान्नमत्तायाश्च चः प्रतिषेधः॥ तथासति हि षड्विंशतिरिसेव ब्रूयादिति चोदकप्रा
प्तत्वानुसंभवस्यानुवादः। शक्नोति च चतुस्त्रिंशदिति कण्ठग्रहणेन चैव प्रतिदुं। गिरापरेन त्वनाघ्रात्वा ग्रहणेन शक्य
मिति वैषम्यं। द्वितीयपूर्वपक्षवादी त्वाह॥ प्राकृतेऽपि वचने क्रियमाणे षड्विंशतिं ब्रूयादिति वचनादेव मेव वक्तव्यम
श्वेन समस्य वचनमिति। न दिदृक्षमं दं। न त्वनेन षड्विंशतिपदं विधीयते। चतुस्त्रिंशन्निषेधपरत्वाद्वाक्यस्य॥ न
हि द्विधो वाक्यभेदादेव शब्दोपबन्धाच्छक्यमिदं विधातुमित्युक्तं। तस्माद्दोषाच्चतावाक्यार्थः॥ न च चतुस्त्रिंशदिति पठितं

श्री. ब्रूयात्। किंतु यथा प्राप्तेमध्रिगुवचनमेवेति। तस्मात्तमस्य वचनं। यत्ते चवैशेषिकमत्र वचनं॥ वनिष्ठुसंनिधानादुरू
२६ कैणवपाभिधानं॥ वनिष्ठुमस्य मारात्विष्टात्स्कमस्य मानात् इति। किमुत्कारादेनोरूवूकस्याभिधानं। नत्वाहस्य वुध्या
वनिष्ठोर्लवनं प्रतिविधाने। उत वपाभिधानं उरूकरात्‌ ४। वपोद्धरणकाले वपां प्रस्तुमानाव निष्ठुमाराविष्ठेति। न
चरत्नयोरेकत्वादुल्कूकाभिधाने प्राप्ते ब्रूमः। न तावद्वनिष्ठोर्लविनव्यस्य लवनं एकां निषेद्धुं। ताद्रूप्यबुद्धिनिषेधात्स्याद्
ष्टार्थत्वात् तस्माद्ववयवत्सुस्यापि वपाभिधानं। दृष्टिं ता चावयवबुस्यन्ति भांष्ये। वपोद्धरणकाले संनिधानाद्वात्स्या वनिष्ठो
र्लवनं प्राप्तमाशंक्यत तन्निवारणार्थं वचनं दृष्टार्थमिति। तस्माद्वपाभिधानमिति वपाविरह्णाब्रूहः। प्रशस्तास्यभिधानं।
प्रशस्ता वाहू रूरूणुनादिति। किं प्रशस्तेनेति। तीयान मस्य भिधानं अस्तिनावाहू छेत्त्वा विति जनतीया हि वचनस्याकारादे
शो छांदसेन कारलोपे कृत प्रशंसा वचनोपमिति। नचगणस्त्‌ शब्दस्यासो प्रसिद्धवचनं मन्यते। ननु स्वधितिसाधनके छेदने राम.
शक्यमेसेः करणत्वं प्रकारण्येतु। मांन्नवर्णिकइत्याकल्पनायां चातिगौरवं। तस्मात्प्रशंसावचनत्वं। प्रा॥ शस्तावाहू रूणुना २६

36

द्विकल्पा विसर्गः। एवं दृष्टार्थता भवति। तस्माद्धाहु विवद्वा बृहः। श्येन शलाकस्य पक्वपलेक पर्णेष्वाहुतिवचनं
प्रसिद्धसंनिधानात्। श्येनमस्य वक्षः कृणुतादिति। श्येनसदृशमित्यर्थः॥ तत्र संशयः। किं सादृश्यमेवात्र विवक्षि
तं उत साकल्यमिति। तत्र सादृश्यमेवाभीप्सितं पिञ्जः सिद्धाः कियंतामिति विधीयते। तेन वक्षः उद्धस्य कर्तनाद्युपाये
न पक्षचरणचंच्वादिसंपादनेन श्येनसंस्थानं कर्तव्यं। तेन युक्तं। अदृष्टार्थताप्रसंगात् कर्तने च वक्षसो वैकल्याद्विविनाशः
स्यात्। इतः साकल्यमत्र विधीयते। अविकलत्वं हि वक्षः श्येनसदृशं भवति। न ह्यनेन प्रकारेण वैकल्यमेवोच्यते न दृष्टार्थत्वात्।
एवं शलाकादोषपर्णीकश्यपे वा सौकवषोरूस्व कपर्णेष्वीवं नेत्यपि साकल्यमेव॥ प्रासंगिके प्रायश्चित्ते न विघ्नेन परार्थता न द
र्शो हि विधीयते॥ अग्निहोत्रे श्रूयते अग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतो हुतेऽग्निहोत्र उद्वायेदि
ति। तत्र संशयः। यदाहवनीये नोद्धृतोऽग्निरग्निहोत्रकाल उद्वाति किं तदा ज्योतिष्मतीष्टिः कर्तव्या नेति। तदर्थमिदं विचार्यते।
किमग्निविष्ठोद्वाननिमित्तमिदं कर्माग्निहोत्रस्याराद्उपकारकं। उतोद्वानपरीतानग्निनिमित्तं तस्यैवाग्नेरुसादृकं संस्कारयि

शा. कमिति। किमात्तं॥ उद्दायेरिति लिङ्गस्य साधात्वर्थस्य निमित्तता। वहस्यग्नेस्तुवाक्येन तस्याधारादुपक्रिया। यदाहि
३८ वाक्यगस्याग्निनिमित्तत्वतिरस्कारेण परस्थस्योद्दानस्य निमित्तता। तन उद्दानस्यकत्वनंगत्वेनासंस्कार्यत्वादग्नेस्तुविशेष
णत्वेन कार्यान्वयाभावाद्द्वाराद्युपकारकत्वमेवेति। निमित्तस्य च प्रकरणेन विशेषणासंभवाद्दर्शार्थस्याप्युद्दानस्याग्नेरु
37 द्दाने संजातं निमित्तमिति कर्मव्यैविरिति। प्राप्ते ब्रूमः। उद्दानस्याग्नियुक्तस्य निःसत्वान्न निमित्तता। न च तस्याग्नि
नाव्याप्तिः कदाचिदपि विघ्ने। अग्निसंबंधस्तावदुद्दानपर्यायस्यापि नाशस्यावयवः। सर्वदा विद्यमानो न निमित्तं भ
वति। न च विनाशस्याचिंतितन निमिषिनादिषु सर्वदा वर्तमानस्याग्निनाव्याप्तिः संभवति। यो निमित्तं स्यादुद्दानपरी
तस्य अग्नेर्निमित्ता नायुक्ता। कादाचित्कीहिनेनाग्नेर्व्याप्तिः ननु सदानमी। यद्यप्यग्नेरप्युद्दानसंबंधो निःसः तथापि
व्याप्तिरनित्या। तेनाग्निरेवाग्नेरुद्दानव्याप्तो निमित्तं। तस्योद्दानपरीतस्य कार्ययोग्यस्य उत्सर्ग्येयमिष्टिरग्निहो राम
त्रांगमग्निहोत्रार्थस्याचाग्नेरुद्दानस्योत्सारणं कुर्वंती अग्निहोत्रांगस्यान्नान्यार्थस्यातस्माद्दर्शार्थेनाग्नावुद्धृत उद्दाने ३८

नैनत्प्रायश्चित्तं॥ धारणे च परार्थत्वान् इदमाम्नाये। धार्य्यो गतश्रिय आहवनीय इति। तत्र यद्ध्रियमाणोग्नि यमाणो
ग्निहोत्रकाल उद्वायति न ता किमिष्टिः कार्या नेति संदेहे अग्निहोत्रार्थं उद्वाने प्रायश्चित्तमिति संस्कृतं॥ धार्यस्य चाग्नि
नाद्यर्थ्यस्तर्हि धार्य्यनेत्यसौ॥ सर्वकर्मणां धार्यमाणोग्निः प्रसेकमंत्रतोग्निहोत्रार्थतापि अस्तीति तदुद्वाने कर्तव्येष्टि॰
नैवं। अस्मार्थमुद्वानेसोषगतश्रीत्वेन धार्यते॥ धारणस्य निमित्तं तन्नोद्धारस्याश्रुतित्वतः। न हि गतश्रीत्वेन पुरुष-
स्याग्नेरुद्धरणं श्रुतं। येनोद्धरणमुद्वानं वाग्नि॰ सर्वार्थ॰ स्यात् किंतु धारणमात्रं तेन न परार्थं कंचित्कर्मविशेषमधिकृ-
त्याग्निमुद्धातितवान् स धारणमात्रं गतश्रीत्वेन करोति। यस्मिंश्च कर्मण्युपसंप्राप्तेग्निरुद्धृत॰ तदर्थमेवोद्धरणं। उ-
द्धृतश्चाग्निस्तदर्थ एव निमित्तवशाद्धार्यमाणः प्रसंगादग्निहोत्रस्योपकरोतीति न तत्र उद्वाने प्रायश्चित्तं॥ ननु स-
र्वेषामेव चोदना प्राप्तकालत्वात्॥ दर्शपक्षमेऽग्न्युद्धरणे क्रियमाणे किमग्निहोत्रांगभूत उद्धरणमंत्रो वाचाता होत्रसा-
ग्नि॰ प्रयोक्तव्यो नेति संशय॰। तत्र दर्शार्थमुद्धरणे वह्नावग्निहोत्रं प्रवर्तते। साधनत्वप्रयुक्तश्च धर्मो नागमपेक्षते। ते

श्रा. नाग्निहोत्रानंगभूतेप्युद्धरणेनदुपकारकत्वमात्रेणयागार्थयोर्दधिपयसोः प्रणीताधर्मादिवत्कर्तृत्वमतएवमंत्रः कालमना
३९ हृत्यकालस्यगुणत्वेनासंभवेपिमंत्रस्यालोपोन्याय्यः॥ अथवोद्धरणमप्येतदग्निहोत्रस्याप्यंगमकालेक्रियमाणं।
३९ मन्यथाग्निहोत्रस्यप्रणयनलोपाद्वैगुण्यंस्यादितिप्राप्तेभिधीयते। कालेखल्वनुपादेयेप्राप्तेकर्मविधीयते। सांगंत
स्मात्तुकालात्स्वाङ्गाधिकारोस्तिकर्मणि॥ अनधिकारिणाचक्रियमाणंनिष्फलंस्यात्। तस्मात्प्राप्तेकालेग्निहोत्रांगमु
द्धरणंसमंत्रंवाकर्तव्यः॥ प्रदानदर्शनंश्रपणेतद्धर्मभोजनार्थत्वात्संसर्गाच्चमधूदकवत्॥ आदिःसःश्रपणीपक्षप
पसिद्धनुरिसत्रसंशयः। किमितननूपयश्वनुणातुल्यंनदेवतासंबंधिप्रदेयत्वेनविधीयते। ननश्रपदेपधर्मैर्वत्सा
पाकरणादिभिःसंबध्यते। उतनचरोरेवश्रपणार्थंप्रणीताकार्यंविधीयते। नतस्यनप्रदेपधर्माक्रमेतेति॥ तत्रच
रोर्देवतयायोगंपयसस्त्वनुसंगतिं। विरधत्वविधिपतेवाक्यमर्थद्वयविधानतः॥ स्यद्वयविशिष्टदेवतासंबंधविधौते राम.
कार्यभिन्नं। तस्मात्सपक्षमानिपविकार्योपिदेवतासंबंधी। सततमर्थस्तुसहश्रपणार्थंसिद्धोऽनचैतदश्रुतिनेष्टिवदि ३९

निमित्तेन कर्मणः। तत्तुल्याधारभूतेनयपस्याचविशेषितः॰। द्रव्यदेवतसंबंधएकार्थोत्रविधीयते॥ यपस्यादिसप्तम्यन्तुरिसुभयवि
शिष्टद्रव्यदेवतासंबंधविधानान्नास्तिवाक्यभेदः। नत्वचतुःप्रथमानिर्देशाद्विवि॰। यपस्तुसप्तमीनिर्देशादाधारत्वेनसं
बध्यते। एवमवाक्यभेदेसतिसप्तमीनिर्देशस्याविवक्षितत्वमंगीकृत्यमनुत्स्वमभ्युपगंतुंतस्मान्नयपसिग्रहेयधर्मा॰।
अभ्युदयेष्टौहोतापनय॰सधर्मःस्यात्प्रकृतत्वात्। अभ्युदयेष्टावपिस्यविशिष्टास्तानिंद्रायप्रदात्रेदधनिचरुंयेणिष्टास्तानि
सर्वेशिपिविष्टायशृतेचरुमितिरदधिशृतयोःसप्तमीनिर्देशात्पूर्ववत्प्रदेयधर्मानकर्तव्याइतिप्राप्तेततोच्यते। नापू
र्वकर्मविधानादृतेऽनेकार्थविधि॰संभवति। नत्विहापूर्वकर्मविधिः। किंतुपूर्वप्रवृत्तनरपर्शकर्मणिनिमित्तेपूर्वमेवापनी
तानांहविषांदेवतांतरसंबंधमात्रंविधीयतइतिस्थितेषष्ठेनेपदितंतुल्यानांदेवतांतरसंबंधोदधिशृतयोःसप्तमीनार्थे
विधिःस्यात्ततःप्राप्तेकर्मण्यनेकार्थविधानाद्वाक्यंभिद्येत। तस्मात्प्रदेयत्वेनैवप्रवृत्तयोर्दधिशृतयोर्देवतांतरसंबंधस्त
तुल्यवद्विधीयतइतिकर्तव्याःप्रदेयधर्माः। अपनयोवाधर्मांतरविधानाच्चरुपयोवतः। य॰ पशुकाम॰ स्यात्सोमावास्यामिष्ट्वावत्सा

श्या. नपाकुर्यात् । येमध्यमानिस्मवेशिर्पिविष्ठायच्छन्नेचरूंयेस्यपि श्रातानिं हयमहातेदधनिचरूमिति श्रुतं । तत्राश्रुद
३८ येष्टितुल्यश्रुतित्वात्तद्वदेवदधिपयसोः प्रदेयत्वंमन्यानः प्रदेयधर्मान्मन्यते ॥ अपूर्वकर्मविधानादमातप्रदानयोर्दधि
पयसोः । समन्याश्रपणार्थमादिसचरुपयोर्वहिधानमिसकर्तव्याः प्रदेयधर्माः । **श्रयणानांतत्पूर्वत्वात्प्रदानार्थे**
विधानंस्यात् । ज्योतिष्टोमेपसोमैत्रावरुणं श्रीणातिसक्तुभिर्मुष्टिनमिसादित्तत्रसंशयः । किंपयः प्रभृतयः प्रदे
यत्वेनसोमद्रुह्यपंनेनन श्रप्रदेयधर्माः कपादपयः । कर्तव्याः । उतसोमसंस्कारार्थत्वेनविधानात्कर्तव्या इति
। तत्रपयसासोमस्यमिश्रणं श्रूयते । किमर्थं । कथंनुनामसोमप्रदीयमानेपयोपिप्रदीयेतेति । एवंहियागनिर्वृत्ति
र्दृष्टमेवप्रयोजनं । सोमसंस्कारार्थत्वेत्वदृष्टार्थतास्यादिति । तावतापदेयत्वंमन्यते ॥ द्वितीययाप्रधानत्वंसोम
स्यात्रावगम्यते ॥ तृतीययाचतादर्थ्यंपयसः प्रतिपाद्यते । श्रुतेश्चादृष्टसंस्कारकल्पनानैवयुज्यते ॥ तस्मात्प्र राम.
देयधर्माणांनपयः प्रभृतौक्रिया ॥ **पर्यग्निकृतानामुत्सर्गेतादर्थ्यमुपधानवत्** ॥ अश्वमेधेर्दृशनायपरस्वत ३८

आलभनमिति प्रकृतस्य श्रूयते। पर्यग्निकृतानारण्याननुत्सृजंतीति। न त्र संदेहः। किमीशानायालभनमुतालभमात्रं वि
धीयते तेनेषां चालब्धानां पर्यग्निकरणविशिष्ट उत्सर्गस्त्यागः। पर्यग्निकरणवाक्येन धीयते। उतेशानायेति यागविधि
ः पर्यग्निकृतानारण्याननुत्सृजंतीति तन्त्रैव गुणविधिरिति। तत्र समस्तस्यापि देवतासंयोगेन यागविधिः। आलभमात्र
मुविधीयते। यागविधित्वे सति पर्यग्निकरणवाक्येन किंचिद्विधेयं लभ्यते। न तावदुत्सर्गः। यागविधिनैव प्राप्तत्वात्।
न पर्यग्निकरणं। चोदकप्राप्तत्वात्। न पर्यग्निकरणोत्तरकाल उत्सर्गः। तस्यापि प्राप्तत्वात्। न पर्यग्निकरणानंतर्यं। आ
नंतर्यशब्दाभावात्। न च लक्षणोपकारपर्यग्निकरणविधानार्थ एवैतत्। न सत्र पर्यग्निकरणं विधीयते। सिद्धवदुपस
र्जनीभूतपर्यग्निकरणनिर्देशात्। न च पर्यग्निकरणं नांगमिति विधिः। प्राप्तत्वादेव। न च नतःपरेषां पशूनां प्र
तिषेधः। प्रतिषेधकस्य शब्दस्याभावात्। न च पर्यग्निकरणकाले उत्सृजंतीति विधिः। कालस्याशब्दत्वात्। कालवि
धौ नुकालांतरं निवर्तेत नांगान्तराणि। तत्र चोदकप्राप्तसमस्तांगयुक्त उत्सर्गः पर्यग्निकरणकाले कथमनुष्ठानुप

श्रा· कयेन। तस्मादालंभमात्रं देवतोद्देशेन पूर्ववाक्ये विधीयते। परस्तु तं। उत्तरवाक्येन चास्योत्सर्गः पर्यग्निकरणविशिष्टश्चो
८० द्यते॥ उच्यते। विनायागेन तद्द्रव्यं देवताच यमच्छति॥ द्रव्यदेवतसंयोगाद्धि तो यागो विधीयते। ईशानायेति देवतावि
गम्यमानमशक्यपह्नोतुं। तच्च न कर्यं विधागमंतरेणालंभमात्रानुपपत्ते। आलंभो यागविधिः। विहिते च तस्मिन्यदि
पर्यग्निकरणवाक्यस्य विधेयं न लभ्यते तन्नो तुम्बारो भवतु। न चैतावता देवतासंबंधस्तानमप्रमाणीकर्तुं शक्यं। त
थ नास्ति विधेयं। अपूर्वतापरत्वात्तत्क्रतोयकारमाकृतपर्यग्निकरणं तागरीति विधीयते। तयाप्रसक्तविहितयागि
राकांक्षः देशेन प्रयोगवचनेन तचोहकमपेक्षते। तस्माद्यागविधिः। उत्तरं तु तत्रैव गुणविधिरिति॥ आज्यसंस्थाप्रति
निधिः स्याद्द्रव्योत्सर्गात्॥ त्वाष्ट्रं पात्नीवतमालभेतेति प्रकृत्य पर्यग्निकृतं पात्नीवतमुत्सृजतीति श्रुतं तत्र पुनः श्रू
यते आज्येन शेषं संस्थापयतीति। तत्र संशयः किं पूर्वस्मिन्नेव कर्मणि पशोरुत्सृष्टस्य स्थाने प्रतिनिधित्वेनाज्यं वि राम·
धीयते किं वा कर्मान्तरविधिरिति। तत्र शेषशब्दात्संस्थापयति शब्दाच्च तत्रैव प्रतिनिधिविधिः। तत्कर्मान्तरं देवतान्तराभा ८०

© Dharmartha Trust J&K. Digitized by eGangotri

वा। नन्वनुपपर्यग्निकरणानंगरीतिविधानमित्युक्तं पूर्वाधिकरणे न तन्नत यैव निराकांक्षस्य न शेषमस्ति। उच्यते
॥पूर्वाधिकरणे यागविधिरालभतिः इत्युक्तं। तदिह मृष्यामः। पर्यग्निकरणानंगरीतिनेराकांक्षात्तु न मृष्यामहे। शे
षसंस्थापयतिशब्दानुपपत्तेः। किंतु यागस्यैव पशुनोपक्रांतस्य चोत्कर्षात्तेग्नीषोमीयविध्यंते ऽनुष्ठीयमाने प
र्यग्निकृतावस्थायामुत्सर्गः परित्यागः पशोर्विधीयते। तस्मिंस्तूत्सृष्टे साकांक्षस्य कर्मणः शेषस्याज्येन संस्थापनं विधीय
ते कर्मांतरस्य त्वनुपक्रांतस्य स्वरूपमेव वक्तव्यं। न समापनं। शेषशब्दस्य चानुपपत्तिः। तस्मात्पूर्वत्रैव प्रतिनिधि
राज्येनेति प्राप्ते ब्रूमः। न प्रतिनिधिः संभवति। तथा हि परिपशोस्त्यागमात्रं क्रियेत ततः उत्सृतिवाक्यविहितदेव
तासंबंधोनानुष्ठितः स्यात्। नैवं देवतासंबंधविधिरप्रमाणं स्यात्। उत्सृति च देवतासंबंधे यागविधित्वं न स्यात्। अस
त्पक्षे ऽष्टवणात् उत्सृति च यागेग्नीषोमीयविध्यंतस्याप्राप्तेः पर्यग्निकृतोत्सर्गः शेषसंस्थापनं चोभयमपि अनु
पपद्यं अथ देवतामुद्दिश्य त्यक्तव्या। ततः पशुसाधनेके यागे पशुनैव मुख्येन साध्यते किमर्थः प्रतिनिधिः देवता

शा. हेशेन चोत्सर्गउक्तमिति वाक्यासिद्धत्वान्नूनं पर्यग्निकरणवाक्येन विधातव्यं । तस्मात्सूर्वोपिकरणोक्तन्यायेन पर्या
४१ ग्निकरणांतां गरीति विधानान्यैव निराकांक्षस्य पूर्वस्य कर्मणः समाप्तत्वान्नशेषमस्ति यस्यान्येन संस्थापन
मुच्येत । तस्मात्कर्मांतरविधिरेवायं । न चरवनाभावः । प्रकृतपात्नीवतपदानुषंगादिह संस्थापयतीति प्रस
यार्थेन भावनया आज्यभागांतिपरिकार्योनुषक्तद्रूवतापदमुक्तं संवध्यते । तद्यमर्थः पात्नीवतमाज्यं कुर्यादिति
। शेषसंस्थाशब्दोन्चसाहचर्या । सूर्वो हियागः पत्नी च देवता । पर्यग्निकरणमात्रेसंस्थापितः सशेषदेवतांतरं
वाज्ययागः पत्नीवद्देवत एवक्रियमाणस्तत्रैवशेषसमापनमिव भवति ॥ यापि आज्यभागांतिपरिक्रेतत्तीयास्तापि
संस्थासंबंधात्तनुषात्तद्देवभागांतिपरिकार्यमात्रं नुद्देवतासंबंधित्वेनविधीयते इति सिद्धं कर्मांतरत्वं ॥ प्राकृतार्थपति
नात्म्यकार्यतोमंत्रसामविषये च संस्कृतो ॥ एवमूह विधिरत्र चिंतितो बाधचिंतनमतः करिष्यते ॥ ॥ इति श्री राम.
पार्थसारथिमिश्रकृतौ शास्त्रदीपिकायां नवमस्याध्यायस्य चतुर्थः पादः ॥ ७ ८ ॥ ४१